# वैयाकरणसिद्धान्तकौमुदी

## णिच्प्रकरणप्रक्रिया


रचयिता

डा.जि.यस्.वि.दत्तात्रेयमूर्तिः



चन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः

एनात्तूर्, काञ्चीपुरम्

| रूपम् | पुटसंख्या |
| --- | --- |
| भावयति | 7 |
| भावयते | 8 |
| भावयाम्बभूव | 8 |
| अबीभवत् | 10 |
| अपीपवत् | 11 |
| अमीमवत् | 12 |
| अयीयवत् | 13 |
| अरीरवत् | 14 |
| अलीलवत् | 15 |
| अजीजवत् | 16 |
| असिस्रवत्-असुस्रवत् | 17 |
| अशिश्रयत्-अशुश्रयत् | 18 |
| अदिद्रवत्-अदुद्रवत् | 18 |
| अपिप्रवत्-अपुप्रवत् | 18 |
| अपिप्लवत्-अपुप्लवत् | 18 |
| अचिच्यवत्-अचुच्यवत् | 18 |
| अशशासत् | 18 |
| अडुढौकत् | 19 |
| अचीचकासत् | 20 |

| | |
|---|---|
| अचचकासत् | 21 |
| चोरयति | 22 |
| अचूचुरत् | 23 |
| अशूशवत् | 24 |
| अशिश्वयत् | 25 |
| अवातस्तम्भवत् | 26 |
| पर्यसीषवत् | 27 |
| न्यसीषहत् | 28 |
| आटिटत् | 29 |
| आशिशत् | 30 |
| मा भवान् प्रेदिधत् | 31 |
| अररम्भत् | 32 |
| अललम्भत् | 33 |
| अजीहयत् | 33 |
| असस्मरत् | 34 |
| अददरत् | 35 |
| अववेष्टत् | 36 |
| अविवेष्टत् | 37 |
| अचचेष्टत् | 38 |
| अचिचेष्टत् | 39 |


SRI CHANDRASEKHARENDRA SARASWATHI VISWA MAHAVIDYALAYA * KANCHEEPURAM * SCSVMV

| | |
|---|---|
| अबिभ्रजत् | 39 |
| अबभ्राजत् | 40 |
| अचीकणत् | 40 |
| अचकाणत् | 42 |
| असूषुपत् | 43 |
| शाययति | 44 |
| छाययति | 45 |
| साययति | 46 |
| ह्वाययति | 46 |
| व्याययति | 47 |
| अजूहवत् | 48 |
| अजुहावत् | 49 |
| अपीप्यत् | 50 |
| अर्पयति | 51 |
| ह्रेपयति | 52 |
| व्लेपयति | 53 |
| रेपयति | 54 |
| क्नोपयति | 54 |
| क्ष्मापयति | 55 |
| स्थापयति | 56 |

| | |
|---|---|
| अतिष्ठिपत् | 57 |
| अजिघ्रिपत् | 58 |
| अजिघ्रपत् | 59 |
| अचीकृतत् | 60 |
| अचिकीर्तत् | 61 |
| अवीवृतत् | 62 |
| अववर्तत् | 62 |
| अमीमृजत् | 63 |
| पालयति | 64 |
| वाजयति | 66 |
| विलीनयति | 66 |
| विलाययति | 67 |
| विलालयति | 68 |
| विलापयति | 68 |
| जटाभिः लापयते | 70 |
| उल्लापयते | 71 |
| उल्लापयते | 72 |
| भापयते | 73 |
| भीषयते | 74 |
| विस्मापयते | 75 |

| | |
|---|---|
| कथं तर्हि विस्मापयन् विस्मितमात्मवृत्तौ इति | 76 |
| स्फावयति | 77 |
| शातयति | 78 |
| गतौ तु गाः शादयति | 79 |
| रोपयति | 79 |
| रोहयति | 80 |
| क्नापयति | 81 |
| ज्ञापयति | 82 |
| अध्यापयति | 83 |
| अध्यजीगपत् | 84 |
| अध्यापिपत् | 85 |
| साधयति | 86 |
| साधयति | 87 |
| वापयति | 88 |
| वाययति | 89 |
| गूहयति | 89 |
| दूषयति | 90 |
| दूषयति | 91 |
| दोषयति | 92 |


SRI CHANDRASEKHARENDRA SARASWATHI VISWA MAHAVIDYALAYA KANCHEEPURAM SCSVMV

श्रीगणेशाय नमः

## **णिच्प्रकरणप्रक्रिया**

### **हेतुमति च**[1](3-1-16)

**भावयति**

भूइत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये भू+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे भू+इ इति जाते **अचोञ्णिति** इति सूत्रेण वृद्धौ भौ+इ इति जाते, **एचोयवायावः** इति सूत्रेण औकारस्य आवादेशे भावि इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण भावि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, भू+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्**इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्यलोपः** इति लोपे, भावि+ल् इति जाते, **तिप्तस्झिसिप्तस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिबादेशे, भावि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, भावि+शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, भावि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, भावे+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे भावयति इति रूपं भवति।

---

[1]प्रयोजकव्यापारे प्रेषणादौ वाच्ये धातोः णिच् स्यात् इति सूत्रार्थः।

**भावयते**

भूइत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये भू+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे भू+इ इति जाते **अचोञ्णिति** इति सूत्रेण वृद्धौ भौ+इ इति जाते, **एचोयवायावः** इति सूत्रेण औकारस्य आवादेशे भावि इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण भावि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे,**णिचश्च** इति सूत्रेण आत्मनेपदे भू+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, भावि+ल् इति जाते, **तिप्तस्झिसिप्तस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तादेशे, भावि+त इति जाते,**टित आत्मनेपदानां टेरे** इति सूत्रेण आत्मनेपदप्रत्ययस्य एत्वे भावि+ ते इति जाते,**तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, भावि+शप्+ते इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, भावि+अ+ते इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, भावे+अ+ते इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे भावयते इति रूपं भवति।

**भावयाम्बभूव**

भूइत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये भू+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्,

उभयोरपि **तस्य लोपः** इति लोपे भू+इ इति जाते **अचोञ्णिति** इति सूत्रेण वृद्धौ भौ+इ इति जाते, **एचोयवायावः** इति सूत्रेण औकारस्य आवादेशे भावि इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण भावि इति णिजन्तस्य धातुसंज्ञायाम्, **परोक्षे लिट्** इति इति सूत्रेण लिड्लकारे, इत्संज्ञालोपयोः कृतयोः भावि+ल् इति जाते, **कास्प्रत्ययादाममन्त्रे लिटि** इति सूत्रेण प्रत्ययान्ताद्धातोः लिटि आमि, भावि+आम्+ल् इति जाते, **आमः** इति सूत्रेण आमः परस्य लेः लुकि, भावि+ल् इति जाते, **अयामन्तल्वाय्येत्विष्णिषु** इति सूत्रेण णेः अयादेशे, भावयाम् इति जाते, **कृत्तद्धितसमासाश्च** इति सूत्रेण लिटः कृत्वात् तदन्तस्य प्रातिपदिकसंज्ञायाम्, **स्वौजसमौट्** इत्यादि सूत्रेण प्रातिपदिकात् सुप्रत्यये भावयाम्+सु इति जाते, **हल्ङ्याभ्यो दीर्घात्सुतिस्यपृक्तं हल्** इति सूत्रेण हल्ङ्यादिलोपे, भावयाम् इति जाते, **कृञ्चानुप्रयुज्यते लिटि** इति सूत्रेण लिडन्तस्य भूधातोः अनुप्रयोगे भावयाम्+भू इति जाते, **परोक्षे लिट्** इति सूत्रेण धातोः लिट्लकारे, **तिप्तस्झि....**इत्यादि सूत्रेण लिटः तिबादेशे, **लिट् च** इति सूत्रेण लिडादेशस्य तिपःआर्धधातुकसंज्ञायाम्,**परस्मैपदानां णलतुसुस्थलथुसणल्वमाः** इति सूत्रेण तिपः णलादेशे, भावयाम्+भू+णल् इति जाते, णलः इत्संज्ञालोपयोः कृतयोः, भावयाम्+भू+अ इति जाते, **भुवो वुग्लिङ्लिटोः** इति सूत्रेण धातोः वुगागमे, इत्संज्ञालोपे च कृते भावयाम्+भूव्+अ इति जाते,**लिटि धातोरनभ्यासस्य** इति सूत्रेण धातोः द्वित्वे, भावयाम्+भूव्+भूव्+अ इति जाते, **पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्,**हलादिः शेषः** इति सूत्रेण हलादिश्शेषे भावयाम्+भू+भूव्+अ इति जाते, **ह्रस्वः** इति सूत्रेण अभ्यास अचः ह्रस्वे,भावयाम्+भु+भूव्+अ इति जाते, **भवतेरः** इति सूत्रेण अभ्यास उकारस्य अत्वे

भावयाम्+भ+भूव्+अ इति जाते,**अभ्यासे चर्च** इति सूत्रेण अभ्यासभकारस्य बकारे भावयाम्+बभूव्अ इति जाते,**मोनुस्वारः** इति सूत्रेण पदान्तमकारस्य अनुस्वारे भावयांबभूव इति जाते वा पदान्तस्य इति सूत्रेण वैकल्पिकानुस्वारे भावयाम्बभूव इति रूपं सिध्यति।

**ओःपुयण्ज्यपरे**[2](7-4-80)

**अबीभवत्**

भू इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये भू+णिच् इति स्थिते इत्सांज्ञालोपयोः कृतयोः भू+इ इति जाते, णिजन्तस्य **सनाद्यन्ताधातवः** इति सूत्रेण धातुसंज्ञायाम्,**लुङ्** इति सूत्रेण धातोः लुङ्लकारे, भू+इ+लङ् इति जाते, इत्साज्ञालोपयोः कृतयोः, भू+इ+ल् इति जाते, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, भू+इ+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,भू+इ+त् इति जाते,**च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य **णिश्रिदुश्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,भू+इ+अ+त् इति जाते,**आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, **चङि** इति सूत्रेण धातोः द्वित्वे भू+भू+इ+अ+त् इति जाते,**पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **ह्रस्वः** इति सूत्रेण

---

[2]सनि परे यदङ्गं तदवयवाभ्यास उकारस्य इत्वं स्यात् पवर्गयण्जकारेष्ववर्णपरेषु परतः इति सूत्रार्थः।

अभ्यासाचः ह्रस्वे भु+भू+इ+अ+त् इति जाते,अभ्यासे चर्च इति सूत्रेण अभ्यासभकारस्य बकारेबु+भू+इ+अ+त् इति जाते, **अचोञ्णिति** इति सूत्रेण वृद्धौ बु+भौ+इ+अ+त् इति जाते, **एचोयवायावः** इति सूत्रेण आवादेशे, बु+भाव्+इ+अ+त् इति जाते, **णौ चङ्युपधाया ह्रस्वः** इति सूत्रेण चङ्परे णौ उपधाह्रस्वे, बु+भव्+इ+अ+त्**सन्वल्लघुनिचङ्परेनभ्यासस्य** इति सूत्रेण चङ्परे णौ अभ्यासस्य सन्वद्भावे,**ओः पुयण्ज्यपरे** इति सूत्रेण अभ्यासोकारस्य इत्वे बि+भव्+इ+अ+त् इति जाते, **दीर्घो लघोः** इति सूत्रेण अभ्यासलघोः इकारस्य दीर्घे बी+भव्+इ+अ+त् इति जाते, **णेरनिटि** इति सूत्रेण आर्धधातुके चङि णेः लोपे बी+भव्+अ+त् इति जाते, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अबी+भव्++अ+त्=अबीभवत् इति रूपं सिध्यति।

**अपीपवत्**

पूङ् पवने इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये पू+णिच् इति स्थिते इत्सांज्ञालोपयोः कृतयोः पू+इ इति जाते, णिजन्तस्य **सनाद्यन्ताधातवः** इति सूत्रेण धातुसंज्ञायाम्, **लुङ्** इति सूत्रेण धातोः लुङ्लकारे, पू+इ+लङ् इति जाते, इत्साज्ञालोपयोः कृतयोः, पू+इ+ल् इति जाते, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, पू+इ+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,पू+इ+त् इति जाते, **च्लि लुङि**इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य **णिश्रिदुश्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,पू+इ+अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः

आर्धधातुकसंज्ञायाम्, **चङि** इति सूत्रेण धातोः द्वित्वे पू+पू+इ+अ+त् इति जाते,**पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **ह्रस्वः** इति सूत्रेण अभ्यासाचः ह्रस्वे पु+पू+इ+अ+त् इति जाते,**अचोञ्णिति** इति सूत्रेण वृद्धौ पु+पौ+इ+अ+त् इति जाते, **एचोयवायावः** इति सूत्रेण आवादेशे, पु+पाव्+इ+अ+त् इति जाते, **णौ चङ्युपधाया ह्रस्वः** इति सूत्रेण चङ्परे णौ उपधाह्रस्वे, पु+पव्+इ+अ+त् **सन्वल्लघुनिचङ्परेनभ्यासस्य** इति सूत्रेण चङ्परे णौ अभ्यासस्य सन्वद्भावे, **ओः पुयण्ज्यपरे** इति सूत्रेण अभ्यासोकारस्य इत्वे पि+पव्+इ+अ+त् इति जाते, **दीर्घो लघोः** इति सूत्रेण अभ्यासलघोः इकारस्य दीर्घे पी+पव्+इ+अ+त् इति जाते, **णेरनिटि** इति सूत्रेण आर्धधातुके चङि णेः लोपे पी+पव्+अ+त् इति जाते, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अपी+पव्+अ+त्=अपीपवत् इति रूपं सिध्यति।

**अमीमवत्**

मूङ् बन्धने इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये मू+णिच् इति स्थिते इत्सांज्ञालोपयोः कृतयोः मू+इ इति जाते, णिजन्तस्य **सनाद्यन्ताधातवः** इति सूत्रेण धातुसंज्ञायाम्, **लुङ्** इति सूत्रेण धातोः लुङ्लकारे, मू+इ+लङ् इति जाते, इत्साज्ञालोपयोः कृतयोः, मू+इ+ल् इति जाते, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, मू+इ+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,मू+इ+त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य **णिश्रिदुश्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,मू+इ+अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः

आर्धधातुकसंज्ञायाम्, **चङि** इति सूत्रेण धातोः द्वित्वे मू+मू+इ+अ+त् इति जाते,**पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **ह्रस्वः** इति सूत्रेण अभ्यासाचः ह्रस्वे मु+मू+इ+अ+त् इति जाते,**अचोञ्णिति** इति सूत्रेण वृद्धौ मु+मौ+इ+अ+त् इति जाते, **एचोयवायावः** इति सूत्रेण आवादेशे, मु+माव्+इ+अ+त् इति जाते, **णौ चङ्युपधाया ह्रस्वः** इति सूत्रेण चङ्परे णौ उपधाह्रस्वे, मु+मव्+इ+अ+त् **सन्वल्लघुनिचङ्परेनभ्यासस्य** इति सूत्रेण चङ्परे णौ अभ्यासस्य सन्वद्भावे, **ओः पुयण्ज्यपरे** इति सूत्रेण अभ्यासोकारस्य इत्वे मि+मव्+इ+अ+त् इति जाते, **दीर्घो लघोः** इति सूत्रेण अभ्यासलघोः इकारस्य दीर्घे मी+मव्+इ+अ+त् इति जाते, **णेरनिटि** इति सूत्रेण आर्धधातुके चङि णेः लोपे मी+मव्+अ+त् इति जाते, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अमी+मव्+अ+त्=अमीमवत् इति रूपं सिध्यति।

**अयीयवत्**

युु मिश्रणे अमिश्रणे च इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये यु+णिच् इति स्थिते इत्सांज्ञालोपयोः कृतयोः यु+इ इति जाते, णिजन्तस्य **सनाद्यन्ताधातवः** इति सूत्रेण धातुसंज्ञायाम्, **लुङ्** इति सूत्रेण धातोः लुङ्लकारे, यु+इ+लङ् इति जाते, इत्साज्ञालोपयोः कृतयोः, यु+इ+ल् इति जाते, **तिप्तस्झि----** इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, यु+इ+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,यु+इ+त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य **णिश्रिदुश्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,यु+इ+अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः

आर्धधातुकसंज्ञायाम्, **चङि** इति सूत्रेण धातोः द्वित्वे यु+यु+इ+अ+त् इति जाते,**पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **अचोञ्णिति** इति सूत्रेण वृद्धौ यु+यौ+इ+अ+त् इति जाते, **एचोयवायावः** इति सूत्रेण आवादेशे, यु+याव्+इ+अ+त् इति जाते, **णौ चङ्युपधाया ह्रस्वः** इति सूत्रेण चङ्परे णौ उपधाह्रस्वे, यु+यव्+इ+अ+त् **सन्वल्लघुनिचङ्परेनभ्यासस्य** इति सूत्रेण चङ्परे णौ अभ्यासस्य सन्वद्भावे, **ओः पुयण्ज्यपरे** इति सूत्रेण अभ्यासोकारस्य इत्वे यि+यव्+इ+अ+त् इति जाते, **दीर्घो लघोः** इति सूत्रेण अभ्यासलघोः इकारस्य दीर्घे यी+यव्+इ+अ+त् इति जाते, **णेरनिटि** इति सूत्रेण आर्धधातुके चङि णेः लोपे यी+यव्+अ+त् इति जाते, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अयी+यव्+अ+त्=अयीयवत् इति रूपं सिध्यति।

**अरीरवत्**

रुशब्दे इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये रु+णिच् इति स्थिते इत्सांज्ञालोपयोः कृतयोः रु+इ इति जाते, णिजन्तस्य **सनाद्यन्ताधातवः** इति सूत्रेण धातुसंज्ञायाम्, **लुङ्** इति सूत्रेण धातोः लुङ्लकारे, रु+इ+लङ् इति जाते, इत्साज्ञालोपयोः कृतयोः, रु+इ+ल् इति जाते, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, रु+इ+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,रु+इ+त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य **णिश्रिदुस्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,रु+इ+अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः

आर्धधातुकसंज्ञायाम्, **चङि** इति सूत्रेण धातोः द्वित्वे रु+रु+इ+अ+त् इति जाते,**पूर्वोऽभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **अचोञ्णिति** इति सूत्रेण वृद्धौ रु+रौ+इ+अ+त् इति जाते, **एचोयवायावः** इति सूत्रेण आवादेशे, रु+राव्+इ+अ+त् इति जाते, **णौ चङ्युपधाया ह्रस्वः** इति सूत्रेण चङ्परे णौ उपधाह्रस्वे, रु+रव्+इ+अ+त् **सन्वल्लघुनिचङ्परेऽनभ्यासस्य** इति सूत्रेण चङ्परे णौ अभ्यासस्य सन्वद्भावे, **ओः पुयण्ज्यपरे** इति सूत्रेण अभ्यासोकारस्य इत्वे रि+रव्+इ+अ+त् इति जाते, **दीर्घो लघोः** इति सूत्रेण अभ्यासलघोः इकारस्य दीर्घे री+रव्+इ+अ+त् इति जाते, **णेरनिटि** इति सूत्रेण आर्धधातुके चङि णेः लोपे री+रव्+अ+त् इति जाते, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अरी+रव्+अ+त्=अरीरवत् इति रूपं सिध्यति।

**अलीलवत्**

लूञ् छेदने इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये लू+णिच् इति स्थिते इत्सांज्ञालोपयोः कृतयोः लू+इ इति जाते, णिजन्तस्य **सनाद्यन्ताधातवः** इति सूत्रेण धातुसंज्ञायाम्, **लूङ्** इति सूत्रेण धातोः लूङ्लकारे, लू+इ+लङ् इति जाते, इत्साज्ञालोपयोः कृतयोः, लू+इ+ल् इति जाते, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, लू+इ+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,लू+इ+त् इति जाते, **च्लि लूङि** इति सूत्रेण धातोः लूङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य **णिश्रिदुश्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,लू+इ+अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः

आर्धधातुकसंज्ञायाम्, **चङि** इति सूत्रेण धातोः द्वित्वे लू+लू+इ+अ+त् इति जाते,**पूर्वोऽभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्,**ह्रस्वः** इति सूत्रेण अभ्यासाचः ह्रस्वे लू+लू+इ+अ+त् इति जाते,**अचोञ्णिति** इति सूत्रेण वृद्धौ लू+लौ+इ+अ+त् इति जाते, **एचोयवायावः** इति सूत्रेण आवादेशे, लू+लाव्+इ+अ+त् इति जाते, **णौ चङ्युपधाया ह्रस्वः** इति सूत्रेण चङ्परे णौ उपधाह्रस्वे, लू+लव्+इ+अ+त् **सन्वल्लघुनिचङ्परेनभ्यासस्य** इति सूत्रेण चङ्परे णौ अभ्यासस्य सन्वद्भावे, **ओः पुयण्ज्यपरे** इति सूत्रेण अभ्यासोकारस्य इत्वे लि+लव्+इ+अ+त् इति जाते, **दीर्घो लघोः** इति सूत्रेण अभ्यासलघोः इकारस्य दीर्घे ली+लव्+इ+अ+त् इति जाते, **णेरनिटि** इति सूत्रेण आर्धधातुके चङि णेः लोपे ली+लव्+अ+त् इति जाते, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अली+लव्+अ+त्=अलीलवत् इति रूपं सिध्यति।

**अजीजवत्**

जु गतौ वेगे च इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये लू+णिच् इति स्थिते इत्संज्ञालोपयोः कृतयोः जु+इ इति जाते, णिजन्तस्य **सनाद्यन्ताधातवः** इति सूत्रेण धातुसंज्ञायाम्, **लुङ्** इति सूत्रेण धातोः लुङ्लकारे, जु+इ+लङ् इति जाते, इत्साज्ञालोपयोः कृतयोः, जु+इ+ल् इति जाते, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, जु+इ+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,जु+इ+त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य **णिश्रिदुश्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः

कृतयोः,जु+इ+अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, **चङि** इति सूत्रेण धातोः द्वित्वे जु+जु+इ+अ+त् इति जाते,**पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **अचोञ्णिति** इति सूत्रेण वृद्धौ जु+जौ+इ+अ+त् इति जाते, **एचोयवायावः** इति सूत्रेण आवादेशे, जु+जाव्+इ+अ+त् इति जाते, **णौ चङ्युपधाया ह्रस्वः** इति सूत्रेण चङ्परे णौ उपधाह्रस्वे, जु+जव्+इ+अ+त् **सन्वल्लघुनिचङ्परेनभ्यासस्य** इति सूत्रेण चङ्परे णौ अभ्यासस्य सन्वद्भावे, **ओः पुयण्ज्यपरे** इति सूत्रेण अभ्यासोकारस्य इत्वे जि+जव्+इ+अ+त् इति जाते, **दीर्घो लघोः** इति सूत्रेण अभ्यासलघोः इकारस्य दीर्घे जी+जव्+इ+अ+त् इति जाते, **णेरनिटि** इति सूत्रेण आर्धधातुके चङि णेः लोपे जी+जव्+अ+त् इति जाते, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अजी+जव्+अ+त्=अजीजवत् इति रूपं सिध्यति।

**स्रवतिश्रुणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा**[3](7-4-81)

**असिस्रवत्-असुस्रवत्**

स्रु गतौ इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये स्रू+णिच् इति स्थिते इत्सांज्ञालोपयोः कृतयोः स्रु+इ इति जाते, णिजन्तस्य **सनाद्यन्ताधातवः** इति सूत्रेण धातुसंज्ञायाम्, **लुङ्** इति सूत्रेण धातोः लुङ्लकारे, स्रु+इ+लङ् इति जाते, इत्साज्ञालोपयोः कृतयोः, स्रु+इ+ल् इति जाते, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, स्र+इ+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण

---

[3]एषामभ्यास उकारस्य इत्वं वा स्यात् सन्यवर्णपरे धात्वक्षरे परे इति सूत्रार्थः।

इत्संज्ञायाम्, **इतश्च**इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,स्रु+इ+त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य **णिश्रिद्रुस्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,स्रु+इ+अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, **चङि** इति सूत्रेण धातोः द्वित्वे स्रु+स्रु+इ+अ+त् इति जाते , **पूर्वोऽभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्,**हलादिःशेषः** इति सूत्रेण हलादिश्शेषे सु+स्रु+इ+अ+त् इति जाते ,**अचोञ्णिति** इति सूत्रेण वृद्धौ सु+स्रौ+इ+अ+त् इति जाते, **एचोयवायावः** इति सूत्रेण आवादेशे, सु+स्राव्+इ+अ+त् इति जाते, **णौ चङ्युपधाया ह्रस्वः** इति सूत्रेण चङ्परे णौ उपधाह्रस्वे, सु+स्रव्+इ+अ+त् (अत्र द्विहल्व्यवधानेन लघुपरकत्वाभावात् सन्वद्भावः न प्रवर्तते इति विवेकः) **स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा** इति सूत्रेण वैकल्पिकतया अभ्यासोकारस्य इत्वे सि+स्रव्+इ+अ+त् इति जाते, **णेरनिटि** इति सूत्रेण आर्धधातुके चङि णेः लोपे सि+स्रव्+अ+त् इति जाते, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे असि+स्रव्+अ+त्=असिस्रवत् इति रूपं सिध्यति।

इत्वस्य वैकल्पिकत्वेन तदभावे असुस्रवत् इति रूपं भवति।

एवम्**अशिश्रयत्-अशुश्रयत्, अदिद्रवत्-अदुद्रवत्,अपिप्रवत्-अपुप्रवत्, अपिप्लवत्-अपुप्लवत्,अचिच्यव्त-अचुच्यवत्।** (अत्र सर्वत्रापि द्विहल्व्यवधानेन लघुपरकत्वाभावात् सन्वद्भावः न प्रवर्तते।)

**अशशासत्**

शासु अनुशिष्टौ इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये शास्+णिच् इति स्थिते इत्सांज्ञालोपयोः कृतयोः शास्+इ इति जाते, णिजन्तस्य **सनाद्यन्ताधातवः** इति सूत्रेण धातुसंज्ञायाम्, **लुङ्** इति सूत्रेण धातोः लुङ्लकारे, शास्+इ+लङ् इति जाते, इत्साज्ञालोपयोः कृतयोः, शास्+इ+ल् इति जाते, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, शास्+इ+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,शास्+इ+त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य**णिश्रिद्रुस्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,शास्+इ+अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, **चङि** इति सूत्रेण धातोः द्वित्वे शास्+शास्+इ+अ+त् इति जाते , **पूर्वोऽभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **हलादिःशेषः** इति सूत्रेण हलादिश्शेषे शा+शास्+इ+अ+त् इति जाते ,**ह्रस्वः** इति सूत्रेण अभ्यासाचः ह्रस्वे श+शास्+इ+अ+त् इति जाते ,**णौ चङ्युपधाया ह्रस्वः** इति सूत्रेण चङ्परे णौ उपधाह्रस्वे प्राप्ते,**नाग्लोपिशास्वृदिताम्** इति सूत्रेण तन्निषेधे( अत्र णेः पूर्वस्य गुरुत्वात् सन्वद्भावः न प्रवर्तते, सन्वद्भावाभावे दीर्घो लघोः इति सूत्रमपि न प्रवर्तते)**णेरनिटि** इति सूत्रेण आर्धधातुके चङि णेः लोपे श+शास्+अ+त् इति जाते, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अश+शास्+अ+त्=अशशासत् इति रूपं सिध्यति।

**अडुढौकत्**

ढौकृ गतौ इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये ढौक्+णिच् इति स्थिते इत्सांज्ञालोपयोः कृतयोः ढौक्+इ इति जाते, णिजन्तस्य **सनाद्यन्ताधातवः** इति

सूत्रेण धातुसंज्ञायाम्, **लुङ्** इति सूत्रेण धातोः लुङ्लकारे, ढौक्+इ+लङ् इति जाते, इत्साज्ञालोपयोः कृतयोः, ढौक्+इ+ल् इति जाते, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्प्रत्यये, ढौक्+इ+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,ढौक्+इ+त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य **णिश्रिद्रुस्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,ढौक्+इ+अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, **चङि** इति सूत्रेण धातोः द्वित्वे ढौक्+ढौक्+इ+अ+त् इति जाते , **पूर्वोऽभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **हलादिःशेषः** इति सूत्रेण हलादिश्शेषे ढौ+ढौक्+इ+अ+त् इति जाते , **ह्रस्वः** इति सूत्रेण अभ्यासाचः ह्रस्वे ढु+ढौक्+इ+अ+त् इति जाते ,**अभ्यासे चर्च** इति सूत्रेण अभ्यासढकारस्य डकारेडु+ढौक्+इ+अ+त् इति जाते ,**णेरनिटि** इति सूत्रेण आर्धधातुके चङि णेः लोपे डु+ढौक्+अ+त् इति जाते, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अडु+ढौक्+अ+त् =अडुढौकत् इति रूपं सिध्यति। (ढौकृधातोः ऋदित्वेन **नाग्लोपिशास्वृदिताम्** इति सूत्रेण प्रतिषेधात् चङि **णौ चङ्युपधाया** इति सूत्रेण उपधाह्रस्वः न भवति। णेः पूर्वस्य गुरुत्वात् दीर्घसन्वद्भावौ न भवतः।)

**अचीचकासत्**

चकासृ दीप्तौ इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये चकास्+णिच् इति स्थिते इत्सांज्ञालोपयोः कृतयोः चकास्+इ इति जाते, णिजन्तस्य **सनाद्यन्ताधातवः** इति सूत्रेण धातुसंज्ञायाम्, **लुङ्** इति सूत्रेण धातोः लुङ्लकारे,

चकास्+इ+लङ् इति जाते, इत्साङ्गालोपयोः कृतयोः, चकास्+इ+ल् इति जाते, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्प्रत्यये, चकास्+इ+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,चकास्+इ+त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य **णिश्रिद्रुस्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,चकास्+इ+अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, **चङि** इति सूत्रेण धातोः द्वित्वे चक्+चकास्+इ+अ+त् इति जाते , **पूर्वोऽभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **हलादिःशेषः** इति सूत्रेण हलादिश्शेषे च+चकास्+इ+अ+त् इति जाते ,**सन्वल्लघुनि चङ्परेऽनग्लोपे** इति सूत्रेण सन्वद्भावे, **सन्यतः** इति सूत्रेण इत्वे चि+चकास्+इ+अ+त् इति जाते ,**दीर्घो लघोः** इति सूत्रेण अभ्यासलघोः दीर्घे ची+चकास्+इ+अ+त् इति जाते ,**णेरनिटि** इति सूत्रेण आर्धधातुके चङि णेः लोपे ची+चकास्+अ+त् इति जाते, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अची+चकास्+अ+त् =अचीचकासत् इति रूपं सिध्यति।

**अचचकासत्**

चकासृ दीप्तौ इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये चकास्+णिच् इति स्थिते इत्सांज्ञालोपयोः कृतयोः चकास्+इ इति जाते, णिजन्तस्य **सनाद्यन्ताधातवः** इति सूत्रेण धातुसंज्ञायाम्, **लुङ्** इति सूत्रेण धातोः लुङ्लकारे, चकास्+इ+लङ् इति जाते, इत्साङ्गालोपयोः कृतयोः, चकास्+इ+ल् इति जाते, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्प्रत्यये, चकास्+इ+तिप् इति जाते,

पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,चकास्+इ+त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य **णिश्रिदुस्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,चकास्+इ+अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, **चङि** इति सूत्रेण धातोः द्वित्वे चक्+चकास्+इ+अ+त् इति जाते , **पूर्वोऽभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **हलादिःशेषः** इति सूत्रेण हलादिश्शेषे च+चकास्+इ+अ+त् इति जाते , **णेरनिटि** इति सूत्रेण आर्धधातुके चङि णेः लोपे च+चकास्+अ+त् इति जाते, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अच+चकास्+अ+त् =अचचकासत् इति रूपं सिध्यति। (सन्वल्लघुनिचङ्परेऽनग्लोपे इति सूत्रे अङ्गं यत्र द्विरुच्यते इति मते तावत् चङ्परे णौ यल्लघु तत्परः यः अभ्यासः इति मते अनेकाच्धातुविषयेसन्वद्भावाभ्यासदीर्घौ न भवतः। इदं माधवमतानुरोधेन। मतान्तरे तु=चङ्परे णौ यदङ्गं तस्य यः अभ्यासः लघुपरः इति पक्षे दीर्घसन्वद्भावौ भवतः। चकासृधातोः ऋदित्वेन **नाग्लोपिशास्वृदिताम्**इति सूत्रेण प्रतिषेधात् चङि **णौ चङ्युपधाया** इति सूत्रेण उपधाह्रस्वः न भवति।)

**चोरयति**

चुर स्तेये इत्यस्माद्धातोः **सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्**इति सूत्रेण चुरधातोः स्वार्थे णिचि चुर्+णिच् इति स्थिते, इत्सांज्ञालोपयोः कृतयोः चुर्+इ इति जाते,**पुगन्तलघूपधस्य च** इति सूत्रेण लघूपधगुणे चोर्+इ=चोरि इति जाते **हेतुमति च** इति सूत्रेण स्वार्थिकणिजन्तात् चुरधातोः

प्रयोजकव्यापारे वाच्ये णिच्प्रत्यये कृते,चोर्+इ+इ इति जाते, **णेरनिटि** इति सूत्रेण णिलोपे, चोरि इति णिजन्तस्य **सनाद्यन्ताधातवः** इति सूत्रेण धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातःइति सूत्रेण धातोः लट्लकारे, चोरि+लट् इति जाते, इत्साज्ञालोपयोः कृतयोः, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, चोरि+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्,**तिङ्शित्सार्वधातुकम्** इति सूत्रेण तिङः सार्वधातुकसंज्ञायाम्,**कर्तरिशप्**इति सूत्रेण शब्विकरणे चोरि+शप्+ति इति जाते, शकारपकारयोः अनुबन्धलोपयोः कृतयोः चोरि+अ+ति इति जाते,**सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे चोरे+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे चोरयति इति रूपं भवति।

**अचूचुरत्**

चुर स्तेये इत्यस्माद्धातोः **सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्व-चवर्मवर्णचूर्णचुरादिभ्यो णिच्** इति सूत्रेण चुरधातोः स्वार्थे णिचि चुर्+णिच् इति स्थिते, इत्सांज्ञालोपयोः कृतयोः चुर्+इ इति जाते,**पुगन्तलघूपधस्य च** इति सूत्रेण लघूपधगुणे चोर्+इ=चोरि इति जाते **हेतुमति च** इति सूत्रेण स्वार्थिकणिजन्तात् चुरधातोः प्रयोजकव्यापारे वाच्ये णिच्प्रत्यये कृते,चोर्+इ+इ इति जाते, **णेरनिटि** इति सूत्रेण णिलोपे, चोर्+इ जाते, इति णिजन्तस्य **सनाद्यन्ताधातवः** इति सूत्रेण धातुसंज्ञायाम्, **लूङ्** इति सूत्रेण धातोः लूङ्लकारे, चोर्+इ+लूङ् इति जाते, इत्साज्ञालोपयोः कृतयोः, चोर्+इ+ल् इति जाते, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, चोरि+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य

लोपे,चोर्+इ+त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य **णिश्रिद्रुस्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,चोर्+इ+अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्,**णौचङ्युपधायाह्रस्वः** इति सूत्रेण उपधाह्रस्वे, चुर्+इ+अ+त् इति जाते,**णेरनिटि** इति सूत्रेण आर्धधातुके चङि णेः लोपे चु+चुर्+अ+त् इति जाते,,**चङि** इति सूत्रेण धातोः द्वित्वे चुर्+चुर्+अ+त् इति जाते , **पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **हलादिःशेषः** इति सूत्रेण हलादिश्शेषे चु+चुर्+अ+त् इति जाते,**दीर्घो लघोः** इति सूत्रेण अभ्यासलघोः दीर्घे चू+चुर्+अ+त् इति जाते, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अचू+चुर्+अ+त् =अचूचुरत् इति रूपं सिध्यति।

**णौ च संश्चङोः**[4](6-1-31)

**अशूशवत्**

टु ओ श्वि गतिवृध्योः इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये श्विधातोः णिच्प्रत्यये कृते,श्वि+इ इति जाते, णिजन्तस्य **सनाद्यन्ताधातवः** इति सूत्रेण धातुसंज्ञायाम्, **लुङ्** इति सूत्रेण धातोः लुङ्लकारे, श्वि+इ+लुङ् इति जाते, इत्साज्ञालोपयोः कृतयोः, श्वि+इ+ल् इति जाते, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, श्वि+इ+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,श्वि+इ+त्

[4]सन्परे चङ्परे च णौ श्वयतेः संप्रसारणं वा स्यात् इति सूत्रार्थः।

इति जाते,**णौ च संश्चङोः** इति सूत्रेण चङि विवक्षिते ण्यन्तस्य श्विधातोः सम्प्रसारणे शु+उ+इ+इ+त् इति जाते,**सम्प्रसारणाच्च** इति सूत्रेण पूर्वरूपे शु+इ+त् इति जाते,**च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य **णिश्रिद्रुस्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,शु+इ+अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, , **चङि** इति सूत्रेण धातोः द्वित्वे शु+शु+अ+त् इति जाते , **पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **अचोञ्णिति** इति सूत्रेण अजन्ताङ्गस्य वृद्धौ शु+शौ+इ+अ+त् इति जाते,**एचोयवायावः** इति सूत्रेण आवादेशे शु+शाव्+इ+अ+त् इति जाते,**णौ चङ्युपधाया ह्रस्वः** इति सूत्रेण उपधाह्रस्वे शु+शव्+इ+अ+त् इति जाते, **दीर्घो लघोः** इति सूत्रेण अभ्यासलघोः दीर्घे शू+शव्+इ+अ+त् इति जाते, इति जाते,**णेरनिटि**इति सूत्रेण आर्धधातुके चङि णेः लोपे शू+शव्+अ+त् इति जाते, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अशू+शव्+इ+अ+त् =अशूशवत् इति रूपं सिध्यति।

**अशिश्वयत्**

(णौ च संश्चङोः इति सूत्रविहितसम्प्रसारणस्य वैकल्पिकत्वेन तदभावे रूपमिदम्)

टु ओ श्वि गतिवृध्योः इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये श्विधातोः णिच्प्रत्यये कृते,श्वि+इ इति जाते, णिजन्तस्य **सनाद्यन्ताधातवः** इति सूत्रेण धातुसंज्ञायाम्, **लुङ्** इति सूत्रेण धातोः लुङ्लकारे, श्वि+इ+लुङ् इति जाते, इत्साज्ञालोपयोः कृतयोः, श्वि+इ+ल् इति जाते, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्प्रत्यये, श्वि+इ+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,श्वि+इ+त्

इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य **णिश्रिद्रुस्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,श्वि+इ+अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, , **चङि** इति सूत्रेण धातोः द्वित्वे श्वि+श्वि+अ+त् इति जाते , **पूर्वोऽभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्,**हलादिःशेषः** इति सूत्रेण हलादिश्शेषे शि+श्वि+इ+अ+त् इति जाते,**अचोञ्णिति** इति सूत्रेण अजन्ताङ्गस्य वृद्धौ शि+श्वै+इ+अ+त् इति जाते, **एचोयवायावः** इति सूत्रेण आयादेशे शि+श्वाया+इ+अ+त् इति जाते, **णौ चङ्युपधाया ह्रस्वः** इति सूत्रेण उपधाह्रस्वे शि+श्वय्+इ+अ+त् इति जाते, **णेरनिटि**इति सूत्रेण आर्धधातुके चङि णेः लोपे शि+श्वय्+अ+त् इति जाते, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अशि+श्वय्+अ+त् = अशिश्वयत् इति रूपं सिध्यति।

**स्तम्भुसिवुसहां चङि**[5](8-3-116)

**अवातस्तम्भवत्**

अव इत्युपसर्गपूर्वक स्तम्भु प्रतिघाते इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये श्विधातोः णिच्प्रत्यये कृते,स्तम्भ्+इ इति जाते, णिजन्तस्य **सनाद्यन्ताधातवः** इति सूत्रेण धातुसंज्ञायाम्, **लुङ्** इति सूत्रेण धातोः लुङ्लकारे, स्तम्भ्+इ+लुङ् इति जाते, इत्साज्ञालोपयोः कृतयोः, स्तम्भ्+इ+ल् इति जाते, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, स्तम्भ्+इ+तिप् इति जाते,

---

[5]उपसर्गानिमित्तः एषां सस्य षः स्यात् चङि इति सूत्रार्थः।

पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,स्तम्भ्+इ+त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य **णिश्रिदुश्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,स्तम्भ्+इ+अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, , **चङि** इति सूत्रेण धातोः द्वित्वे स्तम्भ्+स्तम्भ्+इ+अ+त् इति जाते , **पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **शर्पूर्वाः खयः**इति सूत्रेण तकारस्य शेषेत+स्तम्भ्+इ+अ+त् इति जाते, **णेरनिटि** इति सूत्रेण णिलोपे त+स्तम्भ्+अ+त् इति जाते,**लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अव+अ+त+स्तम्भ्+अ+त् इति जाते सवर्णेदीर्घे अवातस्तम्भत् इति जाते **अवाच्चालम्बनाविदूर्ययोः** इति सूत्रेण अवात् परस्य स्तम्भधातोः षत्वे प्राप्ते**स्तम्भुसिवुसहां चङि** इति सूत्रेण तन्निषेधे अवातस्तम्भत् रूपं सिध्यति।

**पर्यसीषवत्**

परि इत्युपसर्गपूर्वक षिवुतन्तुसन्ताने इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये सिव् धातोः णिच्प्रत्यये कृते,सिव्+इ इति जाते, **पुगन्तलघूपधस्य च** इति सूत्रेण लघूपधगुणे सेव्+इ इति जाते, णिजन्तस्य **सनाद्यन्ताधातवः** इति सूत्रेण धातुसंज्ञायाम्, **लुङ्** इति सूत्रेण धातोः लुङ्लकारे, सेव्+इ+लुङ् इति जाते, इत्साज्ञालोपयोः कृतयोः, सेव्+इ+ल् इति जाते, **तिप्तस्झि---**-इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, सेव्+इ+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि

तस्य लोपे,सेव्+इ+त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य **णिश्रिद्रुस्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,सेव्+इ+अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, **णौ चङ्युपधाया ह्रस्वः** इति सूत्रेण उपधाह्रस्वे सि+सिव+इ+अ+त् इति जाते, **चङि** इति सूत्रेण धातोः द्वित्वे सिव्+सेव्+इ+अ+त् इति जाते , **पूर्वोऽभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **हलादिःशेषः** इति सूत्रेण हलादिश्शेषे शेषे सि+सिव्+इ+अ+त् इति जाते,**दीर्घो लघोः** इत् सूत्रेण दीर्घे सी+सिव्+इ+अ+त् इति जाते,**णेरनिटि** इति सूत्रेण णिलोपे सी+सिव्+अ+त् इति जाते,**आदेशप्रत्यययोः** इति सूत्रेण आदाशस्य सिवेः सकारस्य षत्वे सी+षिव्+अ+त् इति जाते,**लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अ+सी+षेव्+अ+त् इति जाते, परि इत्युपसर्गेणयोगे परि+सी+षेव्+अ+त् इति जाते,**इकोयणचि**इति सूत्रेण यणादेशे पर्यसीषवत् इति जाते **परिनिविभ्यः सेवसितसयसिवुसहस्तुट्स्तुस्वञ्जाम्** इति सूत्रेण परेः परस्य सिवुधातुसकारस्य षत्वे प्राप्ते **स्तम्भुसिवुसहां चङि** इति सूत्रेण तन्निषेधे पर्यसीषहत् रूपं सिध्यति।

**न्यसीषहत्**

नि इत्युपसर्गपूर्वक षह मर्षणे इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये सह् धातोः णिच्प्रत्यये कृते,सह्+इ इति जाते, **अत उपधायाः** इति सूत्रेण उपधावद्धौ साह्+इ इति जाते, णिजन्तस्य **सनाद्यन्ताधातवः** इति सूत्रेण धातुसंज्ञायाम्, **लुङ्** इति सूत्रेण धातोः लुङ्लकारे, साह्+इ+लुङ् इति जाते, इत्संज्ञालोपयोः कृतयोः, साह्+इ+ल् इति जाते, **तिप्तस्झि----**इत्यादि सूत्रेण

प्रथमपुरुषैकवचने तिप्प्रत्यये, साह्+इ+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,साह्+इ+त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य **णिश्रिद्रुस्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,साह्+इ+अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, **णौ चङ्युपधाया ह्रस्वः** इति सूत्रेण उपधाह्रस्वे सह्+इ+अ+त् इति जाते, **चङि** इति सूत्रेण धातोः द्वित्वे सह्+सह्+इ+अ+त् इति जाते , **पूर्वोऽभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **हलादिःशेषः** इति सूत्रेण हलादिश्शेषे शेषे स+सह्+इ+अ+त् इति जाते,**सन्वल्लघुनिचङ्परेऽनग्लोपे** इति सूत्रेण सन्वद्भावे, **सन्यतः** इति सूत्रेण अभ्यासाकारस्य इत्वे सि+सह्+इ+अ+त् इति जाते,**दीर्घो लघोः** इत् सूत्रेण दीर्घे सी+सह्+इ+अ+त् इति जाते, **णेरनिटि** इति सूत्रेण णिलोपे सी+सह्+अ+त् इति जाते, **आदेशप्रत्यययोः** इति सूत्रेण आदेशस्य सिवेः सकारस्य षत्वे सी+षह्+अ+त् इति जाते, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अ+सी+षह्+अ+त् इति जाते, नि इत्युपसर्गयोगे नि+अ+सी+षेव्+अ+त् इति जाते,**इकोयणचि** इति सूत्रेण यणादेशे न्यसीषहत् इति जाते **परिनिविभ्यः सेवसितसयसिवुसहस्तुट्स्तुस्वञ्स्वञ्जाम्** इति सूत्रेण नेः परस्य सिवुधातुसकारस्य षत्वे प्राप्ते **स्तम्भुसिवुसहां चङि** इति सूत्रेण तन्निषेधे न्यसीषहत् रूपं सिध्यति।

**आटिटत्**

अट गतौ इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये अट् धातोः णिच्प्रत्यये कृते,अट्+इ इति जाते, **अत उपधायाः** इति सूत्रेण उपधावृद्धौ

आट्+इ इति जाते, णिजन्तस्य **सनाद्यन्ताधातवः** इति सूत्रेण धातुसंज्ञायाम्, **लूङ्** इति सूत्रेण धातोः लूङ्लकारे, आट्+इ+लूङ् इति जाते, इत्संज्ञालोपयोः कृतयोः, आट्+इ+ल् इति जाते, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्प्रत्यये, आट्+इ+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,आट्+इ+त् इति जाते, **च्लि लूङि** इति सूत्रेण धातोः लूङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य **णिश्रिद्रुस्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,आट्+इ+अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, **णौ चङ्युपधाया ह्रस्वः** इति सूत्रेण उपधाह्रस्वे अट्+इ+अ+त् इति जाते, **चङि** इति सूत्रेण धातोःद्वीतीयैकाचः टिशब्दस्य द्वित्वे अटि+टि+इ+अ+त् इति जाते , **पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **णेरनिटि** इति सूत्रेण णिलोपे अटि+ट्+अ+त् इति जाते, **आडजादीनाम्** इति सूत्रेण अङ्गस्य आडागमे आ+अटिटत् इति जाते,**आटश्च** इति सूत्रेण वृद्धौ आशिशत् इति रूपं सिध्यति।

**आशिशत्**

अशू व्याप्तौ इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये अश् धातोः णिच्प्रत्यये कृते,अश्+इ इति जाते, **अत उपधायाः** इति सूत्रेण उपधावृद्धौ आश्+इ इति जाते, णिजन्तस्य **सनाद्यन्ताधातवः** इति सूत्रेण धातुसंज्ञायाम्, **लूङ्** इति सूत्रेण धातोः लूङ्लकारे, आश्+इ+लूङ् इति जाते, इत्संज्ञालोपयोः कृतयोः, आश्+इ+ल् इति जाते, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्प्रत्यये, आश्+इ+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति

सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,आश्+इ+त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य, **णिश्रिदुस्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,आश्+इ+अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, **णौ चङ्युपधाया ह्रस्वः** इति सूत्रेण उपधाह्रस्वे अश्+इ+अ+त् इति जाते, **चङि** इति सूत्रेण धातोःद्वीतीयैकाचः टिशब्दस्य द्वित्वे अशि+शि+इ+अ+त् इति जाते , **पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **णेरनिटि** इति सूत्रेण णिलोपे, **आडजादीनाम्**इति सूत्रेण आडागमे, वृद्धौ, **आटश्च** इति सूत्रेण वृद्धौ आशिशत् इति रूपं सिध्यति।

**मा भवान् प्रेदिधत्**

एध व्याप्तौ इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये एध् धातोः णिच्प्रत्यये कृते,एध्+इ इति जाते, **माङि लुङ्** इति सूत्रेण माङा योगे धातोः लुङ्लकारे, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्प्रत्यये, एध्+इ+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,एध्+इ+त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य, **णिश्रिदुस्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,एध्+इ+अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, **णौ चङ्युपधाया ह्रस्वः** इति सूत्रेण उपधाह्रस्वे इध्+इ+अ+त् इति जाते, **चङि** इति सूत्रेण धातोःद्वीतीयैकाचः टिशब्दस्य द्वित्वे इधि+धि+अ+त् इति जाते, **पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्,

**अभ्यासे चर्च** इति सूत्रेण अभ्यासधकारस्य जश्त्वेन दकारे इदिधत् इति जाते, **न माङ् योगे** इति सूत्रेण आटागमस्य प्रतिषेधे इदिधत् इति रूपं भवति।

SRI CHANDRASEKHARENDRA SARASWATHI VISWA MAHAVIDYALAYA
KANCHEEPURAM
SCSVMV

**रभेरशब्लिटोः**[6](7-1-63)

**लभेश्च**[7](7-1-64)

**अररम्भत्**

रभराभस्ये इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये रभ् धातोः णिच्प्रत्यये कृते,रभ्+इ इति जाते, रभेरशब्लिटोः इति सूत्रेण नुमागमे रन्भ्+इ इति जाते,**सनाद्यन्ताधातवः** इति सूत्रेण णिजन्तस्य धातुसंज्ञायाम्,**लुङ्** इति सूत्रेण धातोः लुङ्लकारे, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्प्रत्यये, रन्भ्+इ+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,रन्भ्+इ+त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य, **णिश्रिद्रुस्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,रन्भ्+इ+अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, **चङि** इति सूत्रेण धातोः द्वित्वे **रन्भ्+रन्भ्**+इ+अ+त् इति जाते, **पूर्वोऽभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **हलादिश्शेषः** इति सूत्रेण हलादिश्शेषे **ररन्भ्**+इ+अ+त् जाते,**णेरनिटि** इति सूत्रेण णिलोपे,**नश्चापदान्तस्य झलि** इति सूत्रेण अनुस्वारे र+रंभ्+अ+त् अनुस्वारस्य ययि परसवर्णः इति सूत्रेण परसवर्णे

---

[6]रभेः नुम् स्यात् अचि न तु शब्लिटोः इति सूत्रार्थः।

[7]लभेरपि नुम् स्यात् अचि, न तु शब्लिटोः इति सूत्रार्थः।

मकारेररम्भ्+अ+त्  इति जाते **लूङ्लङ्लृक्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अररम्भत् इति रूपं भवति।

**अललम्भत्**

डुलभष् प्राप्तौ  इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये लभ् धातोः णिच्प्रत्यये कृते,लभ्+इ इति जाते, **लभेश्च** इति सूत्रेण नुमागमे लन्भ्+इ इति जाते, **सनाद्यन्ताधातवः**   इति सूत्रेण णिजन्तस्य धातुसंज्ञायाम्, **लूङ्** इति सूत्रेण धातोः लूङ्लकारे, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, लन्भ्+इ+इ +तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च**  इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,लन्भ्+इ+इ +त् इति जाते, **च्लि लूङि**  इति सूत्रेण धातोः लूङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य, **णिश्रिद्रुस्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,लन्भ्+इ+इ +अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, **चङि** इति सूत्रेण धातोः  द्वित्वे लन्भ्+लन्भ्+इ +अ+त् इति जाते, **पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **हलादिश्शेषः** इति सूत्रेण हलादिश्शेषेल+लन्भ्+इ +अ+त् जाते,**णेरनिटि** इति सूत्रेण णिलोपे, **नश्चापदान्तस्य झलि** इति सूत्रेण अनुस्वारे ल+लंभ्+इ  +अ+त् अनुस्वारस्य ययि परसवर्णः इति सूत्रेण परसवर्णे मकारे ललम्भ्+अ+त्  इति जाते **लूङ्लङ्लृक्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अललम्भत् इति रूपं भवति।

**अजीहयत्**

हि गतौ वृद्धौ च इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये हि धातोः णिच्प्रत्यये कृते,हि+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण णिजन्तस्य धातुसंज्ञायाम्, **लुङ्** इति सूत्रेण धातोः लुङ्लकारे, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, हि+इ +तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,लन्भ्+इ +त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य, **णिश्रिदुश्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,हि+इ +अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, **चङि** इति सूत्रेण धातोः द्वित्वे हि+हि+इ +अ+त् इति जाते, **पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **कुहोश्चुः** इति सूत्रेण अभ्यासहकारस्य चुत्वेन झकारे झि+हि+इ +अ+त् इति जाते, **अभ्यासे चर्च** इति सूत्रेण अभ्यास झकारस्य जकारे जि+हि+इ +अ+त् **अचोञ्णिति** इति सूत्रेण वृद्धौ जि+है+इ +अ+त्जाते,**एचोयवायावः** इति सूत्रेण आयादेशे जि+हाय्+इ +अ+त् इति जाते, **णौ चङ्युपधाया ह्रस्वः** इति सूत्रेण उपधाह्रस्वे जि+हय्+इ +अ+त् इति जाते,**सन्वल्लघुनिचङ्परेनग्लोपे** इति सूत्रेण सन्वद्भावे, **दीर्घो लघोः** इति सूत्रेण अभ्यासस्य दीर्घे जी+हय्+इ +अ+त् इति जाते, **णेरनिटि** इति सूत्रेण णिलोपे, जी+हय् +अ+त् इति जाते,**लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अजीहयत्इति रूपं भवति।

**अत्स्मृदृत्वरप्रथम्रदस्तृस्पशाम्**[8](6-4-95)

**असस्मरत्**

स्मृ इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये हि धातोः णिच्प्रत्यये कृते,स्मृ+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण णिजन्तस्य धातुसंज्ञायाम्, **लूङ्** इति सूत्रेण धातोः लूङ्लकारे, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, स्मृ+इ +तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,स्मृ +इ +त् इति जाते, **च्लि लूङि** इति सूत्रेण धातोः लूङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य, **णिश्रिदुश्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,स्मृ +इ +अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, **चङि** इति सूत्रेण धातोः द्वित्वे स्मृ+स्मृ+इ +अ+त् इति जाते, **पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **उरत्** इति सूत्रेण अभ्यासऋवर्णस्य अत्वे रपरत्वे सर्+स्मृ+इ +अ+त् इति जाते, **हलादिश्शेषः** इति सूत्रेण हलादिश्शेषे स+स्मृ+इ +अ+त् इति जाते,**अचोञ्णिति** इति सूत्रेण वृद्धौ स+स्मार्+इ +अ+त् जाते, **णौ चङ्युपधाया ह्रस्वः** इति सूत्रेण उपधाह्रस्वे स+स्मर्+इ +अ+त् इति जाते,**अत्स्मृदृत्वरप्रथम्रदस्तृस्पशाम्**इति सूत्रेण अभ्यासाकारस्य अत्वे स+स्मर्+इ +अ+त् इति जाते,**णेरनिटि** इति सूत्रेण णिलोपे, स+स्मर्+अ+त् इति जाते, **लूङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे असस्मरत्इति रूपं भवति।

---

[8]एषामभ्यासस्य अकारः अन्तादेशः स्यात् चङ्परे णौ इति सत्रार्थः।

**अददरत्**

दृ विदारणे इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये हि धातोः णिच्प्रत्यये कृते,दृ+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण णिजन्तस्य धातुसंज्ञायाम्, **लूङ्** इति सूत्रेण धातोः लूङ्लकारे, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, दृ+इ +तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,दृ+इ +त् इति जाते, **च्लि लूङि** इति सूत्रेण धातोः लूङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य, **णिश्रिदुश्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,दृ +इ +अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, **चङि** इति सूत्रेण धातोः द्वित्वे दृ+दृ+इ +अ+त् इति जाते, **पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **उरत्** इति सूत्रेण अभ्यासऋवर्णस्य अत्वे रपरत्वे दर्+दृ+इ +अ+त् इति जाते, **हलादिश्शेषः** इति सूत्रेण हलादिश्शेषे द+दृ+इ +अ+त् इति जाते, **अचोञ्णिति** इति सूत्रेण वृद्धौ द+दार्+इ +अ+त् जाते, **णौ चङ्युपधाया ह्रस्वः** इति सूत्रेण उपधाह्रस्वे द+दर्+इ +अ+त् इति जाते,**अत्स्मृदृत्वरप्रथम्रदस्तृस्पशाम्** इति सूत्रेण अभ्यासाकारस्य अत्वे द+दर्+इ +अ+त् इति जाते,, **णेरनिटि** इति सूत्रेण णिलोपे, द+दर्+अ+त् इति जाते, **लूङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अददरत्इति रूपं भवति।

**विभाषा वेष्टिचेष्टयोः**[9](7-4-96)

---

[9]अभ्यासस्य आत्वं वा स्यात् चङ्परे णौ इति सूत्रार्थः।

**अववेष्टत्**

वेष्ट वेष्टने इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये वेष्ट् धातोः णिच्प्रत्यये कृते,वेष्ट्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण णिजन्तस्य धातुसंज्ञायाम्, **लूङ्** इति सूत्रेण धातोः लूङ्लकारे, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, वेष्टे+इ +तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,वेष्ट् +इ +त् इति जाते, **च्लि लूङि** इति सूत्रेण धातोः लूङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य, **णिश्रिदुश्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,वेष्ट् +इ +अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, **चङि** इति सूत्रेण धातोः द्वित्वे वेष्ट्+वेष्ट्+इ +अ+त् इति जाते, **पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **हलादिश्शेषः** इति सूत्रेण हलादिश्शेषे वे+वेष्ट्+इ +अ+त् इति जाते, **ह्रस्वः** इति सूत्रेण अभ्यासस्य ह्रस्वे वि+वेष्ट्+इ +अ+त् इति जाते, **विभाषा वेष्टिचेष्टयोः** इति सूत्रेण अभ्यासस्य अत्वे व+वेष्ट्+इ +अ+त् इति जाते,**णेरनिटि** इति सूत्रेण णिलोपे, व+वेष्ट्+अ+त् इति जाते,**लूङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अववेष्टत्इति रूपं भवति।

**अविवेष्टत्**

वेष्ट वेष्टने इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये वेष्ट् धातोः णिच्प्रत्यये कृते,वेष्ट्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण णिजन्तस्य धातुसंज्ञायाम्, **लूङ्** इति सूत्रेण धातोः लूङ्लकारे, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, वेष्टे+इ +तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण

इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,वेष्ट् +इ +त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य, **णिश्रिद्रुस्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,वेष्ट् +इ +अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, **चङि** इति सूत्रेण धातोः द्वित्वे वेष्ट्+वेष्ट्+इ +अ+त् इति जाते, **पूर्वोऽभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **हलादिश्शेषः** इति सूत्रेण हलादिश्शेषे वे+वेष्ट्+इ +अ+त् इति जाते, **ह्रस्वः** इति सूत्रेण अभ्यासस्य ह्रस्वे वि+वेष्ट्+इ +अ+त् इति जाते, **विभाषा वेष्टिचेष्ट्योः** इति सूत्रेण विहितस्य अभ्यासात्वस्य वैकल्पिकत्वेन तद्भावे इकारे वि+वेष्ट्+इ +अ+त् इति जाते, **णेरनिटि** इति सूत्रेण णिलोपे, वि+वेष्ट्+अ+त् इति जाते, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अविवेष्टत्इति रूपं भवति।

**अचचेष्टत्**

चेष्ट वेष्टने इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये वेष्ट् धातोः णिच्प्रत्यये कृते,चेष्ट्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण णिजन्तस्य धातुसंज्ञायाम्, **लुङ्** इति सूत्रेण धातोः लुङ्लकारे, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, चेष्ट्+इ +तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,चेष्ट् +इ +त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य, **णिश्रिद्रुस्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,चेष्ट् +इ +अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः

आर्धधातुकसंज्ञायाम्, **चङि** इति सूत्रेण धातोः द्वित्वे चेष्ट्+चेष्ट्+इ +अ+त् इति जाते, **पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **हलादिश्शेषः** इति सूत्रेण हलादिश्शेषे चे+चेष्ट्+इ +अ+त् इति जाते, **ह्रस्वः** इति सूत्रेण अभ्यासस्य ह्रस्वे चि+चेष्ट्+इ +अ+त् इति जाते, **विभाषा वेष्टिचेष्टयोः** इति सूत्रेण अभ्यासस्य अत्वे च+चेष्ट्+इ +अ+त् इति जाते, **णेरनिटि** इति सूत्रेण णिलोपे, च+चेष्ट्+अ+त् इति जाते, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अचचेष्टत्इति रूपं भवति।

SRI CHANDRASEKHARENDRA SARASWATHI VISWA MAHAVIDYALAYA
KANCHEEPURAM
SCSVMV

**अचिचेष्टत्**

चेष्ट वेष्टने इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये वेष्ट् धातोः णिच्प्रत्यये कृते,चेष्ट्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण णिजन्तस्य धातुसंज्ञायाम्, **लूङ्** इति सूत्रेण धातोः लूङ्लकारे, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, चेष्ट्+इ +तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,चेष्ट् +इ +त् इति जाते, **च्लि लूङि** इति सूत्रेण धातोः लूङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य, **णिश्रिदुश्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,चेष्ट् +इ +अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, **चङि** इति सूत्रेण धातोः द्वित्वे चेष्ट्+चेष्ट्+इ +अ+त् इति जाते, **पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **हलादिश्शेषः** इति सूत्रेण हलादिश्शेषे चे+चेष्ट्+इ +अ+त् इति जाते, **ह्रस्वः** इति सूत्रेण अभ्यासस्य ह्रस्वे चि+चेष्ट्+इ +अ+त् इति जाते, **विभाषा वेष्टिचेष्ट्योः** इति सूत्रेण विहितस्य अभ्यासात्वस्य वैकल्पिकत्वेन तदभावे इकारे चि+चेष्ट्+इ +अ+त् इति जाते, **णेरनिटि** इति सूत्रेण णिलोपे, चि+चेष्ट्+अ+त् इति जाते, **लूङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अचिचेष्टत्इति रूपं भवति।

**अबिभ्रजत्**

भ्राजृ दीप्तौ इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये भ्राज् धातोः णिच्प्रत्यये कृते,भ्राज्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण णिजन्तस्य धातुसंज्ञायाम्, **लूङ्** इति सूत्रेण धातोः लूङ्लकारे, **तिप्तस्झि----**इत्यादि

सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, भ्राज्+इ +तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,भ्राज् +इ +त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य, **णिश्रिद्रुस्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,भ्राज् +इ +अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्,**भ्राजभासभाष** ---इत्यादि सूत्रेण उपधायाः ह्रस्वे भ्रज्+ इ+अ+त् इति जाते, **चङि** इति सूत्रेण धातोः द्वित्वे भ्रज्+भ्रज्+इ+अ+त् इति जाते, **पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **हलादिश्शेषः** इति सूत्रेण हलादिश्शेषे भ+भ्रज्+इ +अ+त् इति जाते, **अभ्यासे चर्च** इति सूत्रेण अभ्यासभकारस्य जश्त्वेन बकारेब+भ्रज्+इ+अ+त् इति जाते, **सन्वल्लघुनिचङ्परेनग्लोपे** इति सूत्रेण सन्वद्भावे, **सन्यतः** इति सूत्रेण इत्वे बि+भ्रज्+इ+अ+त् इति जाते, **णेरनिटि** इति सूत्रेण णिलोपे, बि+भ्रज्+अ+त् इति जाते, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अबिभ्रजत्इति रूपं भवति।

**अबभ्राजत्**

भ्राजृ दीप्तौ इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये भ्राज् धातोः णिच्प्रत्यये कृते,भ्राज्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण णिजन्तस्य धातुसंज्ञायाम्, **लुङ्** इति सूत्रेण धातोः लुङ्लकारे, **तिप्तस्झि**----इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, भ्राज्+इ +तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,भ्राज् +इ +त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति

सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य, **णिश्रिदुश्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,भ्राज् +इ +अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्,**भ्राजभासभाष** ---इत्यादि सूत्रेण विहितस्यउपधाह्रस्वस्य वैकल्पिकत्वेन तदभावे भ्राज्+ इ+अ+त् इति जाते, **चङि** इति सूत्रेण धातोः द्वित्वे भ्राज्+भ्राज्+इ+अ+त् इति जाते, **पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **हलादिश्शेषः** इति सूत्रेण हलादिश्शेषे भा+भ्राज्+इ +अ+त् इति जाते,**ह्रस्वः** इति सूत्रेण अभ्यासस्याचः ह्रस्वे भ+भ्राज्+इ +अ+त्**अभ्यासे चर्च** इति सूत्रेण अभ्यासभकारस्य जश्त्वेन बकारेब+भ्राज्+इ+अ+त् इति जाते,**णेरनिटि** इति सूत्रेण णिलोपे, ब+भ्राज्+अ+त् इति जाते, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अबभ्राजत्इति रूपं भवति।

**अचीकणत्**

कण् शब्दे इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये कण् धातोः णिच्प्रत्यये कृते,कण्+इ इति जाते,**अत उपधायाः** इति सूत्रेण उपधावृद्धौ काण्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण णिजन्तस्य धातुसंज्ञायाम्, **लुङ्** इति सूत्रेण धातोः लुङ्लकारे, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, काण्+इ +तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,काण् +इ +त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य, **णिश्रिदुश्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,काण् +इ +अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः

आर्धधातुकसंज्ञायाम्,**काण्यादीनां वेति वक्तव्यम्** इतिवार्तिकेणउपधाह्रस्वेकण्+इ+अ+त् इति जाते, **चङि** इति सूत्रेण धातोः द्वित्वे कण्+कण+इ+अ+त् इति जाते, **पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **हलादिश्शेषः** इति सूत्रेण हलादिश्शेषे क+कण्+इ +अ+त् इति जाते, **कुहोश्चुः** इति सूत्रेण अभ्यासककारस्य जश्त्वेन चकारेच+कण्+इ+अ+त् इति जाते,**सन्वल्लघुनिचङ्परेनग्लोपे** इति सूत्रेण सन्वद्भावे, **सन्यतः** इति सूत्रेण इत्वे चि+कण्+इ+अ+त् इति जाते,**णेरनिटि** इति सूत्रेण णिलोपे, चि+कण्+अ+त् इति जाते,**दीर्घो लघोः** इति सूत्रेण अभ्यासलघोः दीर्घे ची+कण्+इ+अ+त् इति जाते,**लूङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अचीकणत्इति रूपं भवति।

**अचकाणत्**

कण् शब्दे इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये कण् धातोः णिच्प्रत्यये कृते,कण्+इ इति जाते,**अत उपधायाः** इति सूत्रेण उपधावृद्धौ काण्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण णिजन्तस्य धातुसंज्ञायाम्, **लूङ्** इति सूत्रेण धातोः लूङ्लकारे, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, काण्+इ +तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,काण् +इ +त् इति जाते, **च्लि लूङि** इति सूत्रेण धातोः लूङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य, **णिश्रिदुश्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,काण् +इ +अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्,**काण्यादीनां वेति वक्तव्यम्** इति वार्तिकेन विहितस्यउपधाह्रस्वस्य

वैकल्पिकत्वेन तदभावे, काण्+इ+अ+त् इति जाते, **चङि** इति सूत्रेण धातोः द्वित्वे काण्+काण+इ+अ+त् इति जाते, **पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **हलादिश्शेषः** इति सूत्रेण हलादिश्शेषे का+काण्+इ +अ+त् इति जाते,**ह्रस्वः इति** सूत्रेण अभ्यासस्य अचः ह्रस्वे क+काण्+इ+अ+त् इति जाते, **कुहोश्चुः** इति सूत्रेण अभ्यासककारस्य जश्त्वेन चकारेच+काण्+इ+अ+त् इति जाते, **णेरनिटि** इति सूत्रेण णिलोपे, च+काण्+अ+त् इति जाते, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अचकाणत्इति **रूपं** भवति।

**स्वापेश्चङि**[10](6-1-18)

**असूषुपत्**

ञिष्वप् शये इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये स्वप् धातोः णिच्प्रत्यये कृते,कण्+इ इति जाते,**अत उपधायाः** इति सूत्रेण उपधावृद्धौ स्वाप्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण णिजन्तस्य धातुसंज्ञायाम्, **लुङ्** इति सूत्रेण धातोः लुङ्लकारे, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, स्वाप्+इ +तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,स्वाप् +इ +त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य, **णिश्रिदुश्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,स्वाप् +इ +अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः

---

[10]ण्यन्तस्य स्वपेः चङि संप्रसारणं स्यात् इति सूत्रार्थः।

आर्धधातुकसंज्ञायाम्,**स्वापेश्चङि** इति सूत्रेण स्वापेः संप्रसारणे, स्उआप्+इ+अ+त् इति जाते,**सम्प्रसारणाच्च** इति सूत्रेण सम्प्रसारणे पूर्वरूपे सुप्+सुप्+इ+अ+त् इति जाते, **चङि** इति सूत्रेण धातोः द्वित्वे सुप्+सुप्+इ+अ+त् इति जाते, **पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **हलादिश्शेषः** इति सूत्रेण हलादिश्शेषे सु+सुप्+इ +अ+त् इति जाते,**दीर्घो लघोः** इति सूत्रेण अभ्यासलघोः दीर्घे सू+सुप्+इ +अ+त् इति जाते,, **णेरनिटि** इति सूत्रेण णिलोपे, सू+सुप्+अ+त् इति जाते,**आदेशप्रत्यययोः** इति सूत्रेण आदेशशकारस्य षत्वे सू+षुप्+ अ+त्**लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे असूषुपत्इति रूपं भवति।

**शाच्छासाह्वाव्यावेपां युक्**[11](7-3-37)

**शाययति**

शो तनूकरणे इत्यस्माद्धातोः **आदेच उपदेशेशिति** इति सूत्रेण आत्वे शा इति जाते, **हेतुमति च** इति सूत्रेण णिच्प्रत्यये शा+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे शा+इ इति जाते**शाच्छासाह्वाव्यावेपां युक्**इति सूत्रेण युगागमे शाय्+इ इति जाते,**सनाद्यन्ताधातवः** इति सूत्रेण शायि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, शायि+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्,

---

[11]शो तनूकरणे, छो छेदने, षो अन्तकर्मणि, ह्वेञ् स्पर्धायां शब्दे च, व्येञ् संवरणे एषां धातूनां युगागमः स्यात् णौ परे इति सूत्रार्थः।

उभयोरपि **तस्य लोपः** इति लोपे, शायि+ल् इति जाते, **तिप्तस्झिसिप्तस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिबादेशे, शायि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, शायि+शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, शायि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, शाये+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे शाययति इति रूपं भवति।

**छाययति**

छोछेदने इत्यस्माद्धातोः **आदेच उपदेशेशिति** इति सूत्रेण आत्वे छा इति जाते, **हेतुमति च** इति सूत्रेण णिच्प्रत्यये छा+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे छा+इ इति जाते **शाच्छासाह्वाव्यावेपां युक्** इति सूत्रेण युगागमे छाय्+इ इति जाते,**सनाद्यन्ताधातवः** इति सूत्रेण शायि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, छायि+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, छायि+ल् इति जाते, **तिप्तस्झिसिप्तस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिबादेशे, छायि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, छायि+शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्,

छायि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, छाये+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे छाययति इति रूपं भवति।

**साययति**

षो अन्तकर्मणि इत्यस्माद्धातोः **आदेच उपदेशेशिति** इति सूत्रेण आत्वे सा इति जाते, **हेतुमति च** इति सूत्रेण णिच्प्रत्यये सा+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे सा+इ इति जाते **शाच्छासाह्वाव्यावेपां युक्** इति सूत्रेण युगागमे साय्+इ इति जाते,**सनाद्यन्ताधातवः** इति सूत्रेण सायि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, सायि+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, सायि+ल् इति जाते, **तिप्तस्झिसिप्तस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिबादेशे, सायि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, सायि+शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, सायि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, साये+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे साययति इति रूपं भवति।

**ह्वाययति**

ह्वेञ् स्पर्धायां शब्दे च इत्यस्माद्धातोः **आदेच उपदेशेशिति**इति सूत्रेण आत्वे ह्वा इति जाते, **हेतुमति च** इति सूत्रेण णिच्प्रत्यये ह्वा+णिच् इति स्थिते चकारस्य

**हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे ह्वा+इ इति जाते **शाच्छासाह्वाव्यावेपां युक्** इति सूत्रेण युगागमे ह्वाय्+इ इति जाते,**सनाद्यन्ताधातवः** इति सूत्रेण ह्वायि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, ह्वायि+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, ह्वायि+ल् इति जाते, **तिप्तस्झिसिप्थस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिबादेशे, ह्वायि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, ह्वायि+शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, ह्वायि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, ह्वाये+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे ह्वाययति इति रूपं भवति।

**व्याययति**

व्येञ् संवरणे इत्यस्माद्धातोः **आदेच उपदेशेशिति** इति सूत्रेण आत्वे व्या इति जाते, **हेतुमति च** इति सूत्रेण णिच्प्रत्यये व्या+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे व्या+इ इति जाते **शाच्छासाह्वाव्यावेपां युक्** इति सूत्रेण युगागमे व्याय्+इ इति जाते,**सनाद्यन्ताधातवः** इति सूत्रेण व्यायि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, व्यायि+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य

इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, व्यायि+ल् इति जाते, **तिप्तस्झिसिप्तस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिबादेशे, व्यायि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, व्यायि+शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, व्यायि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, व्याये+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे व्याययति इति रूपं भवति।

**ह्वः सम्प्रसारणम्**[12](6-1-32)

**अजूहवत्**

ह्वेञ् स्पर्धायां शब्दे च इत्यस्माद्धातोः**आदेच उपदेशेशिति** इति सूत्रेण आत्वेह्वा इति जाते**हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये ह्वाधातोः णिच्प्रत्यये कृते,ह्वा+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण णिजन्तस्य धातुसंज्ञायाम्, **लुङ्** इति सूत्रेण धातोः लुङ्लकारे, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्प्रत्यये, स्वाप्+इ +तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,ह्वा +इ +त् इति जाते,**ह्वः सम्प्रसारणम् इति** सूत्रेण ह्वेञः सम्प्रसारणे ह् उ आ+इ +त् इति जाते, **सम्प्रसारणाच्च**

---

[12]सन्परे चङ्परे च णौ यदङ्गं ह्वः सम्प्रसारणं स्यात् इति सूत्रार्थः।

इति सूत्रेण पूर्वरूपे हु+इ+त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य, **णिश्रिदुस्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,हु +इ +अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्,**चङि** इति सूत्रेण धातोः द्वित्वे हु+हु+इ+अ+त् इति जाते, **पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **कुहोश्चुः** इति सूत्रेण अभ्यासहकारस्य झकारे झु+हु+इ+अ+त् इति जाते, **अभ्यासे चर्च** इति सूत्रेण झकारस्य जकारे जु+हु+इ+अ+त् इति जाते,**अचोञ्णिति** इति सूत्रेण वृद्धौजु+हौ+इ +अ+त् इति जाते,**एचोयवायावः** इति सूत्रेण आयादेशे जु+हाव्+इ+अ+त् इति जाते,**काण्यादीनां वेति वक्तव्यम्** इति वार्तिकेन ह्रस्वे जु+हव्+इ+अ+त् इति जाते,**दीर्घो लघोः** इति सूत्रेण अभ्यासलघोः दीर्घे जू+हव्+इ+अ+त् इति जाते, इति जाते,, **णेरनिटि** इति सूत्रेण णिलोपे, जु+हव्+अ+त् इति जाते, इति जाते, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अजूहवत्इति रूपं भवति।

**अजुहावत्**

ह्वेञ् स्पर्धायां शब्दे च इत्यस्माद्धातोः **आदेच उपदेशेशिति** इति सूत्रेण आत्वे ह्वा इति जाते **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये ह्वाधातोः णिच्प्रत्यये कृते,ह्वा+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण णिजन्तस्य धातुसंज्ञायाम्, **लुङ्** इति सूत्रेण धातोः लुङ्लकारे, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, स्वाप्+इ +तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,ह्वा +इ +त् इति जाते, **ह्वः सम्प्रसारणम् इति** सूत्रेण ह्वेञः सम्प्रसारणे ह् उ आ+इ +त् इति जाते, **सम्प्रसारणाच्च**

इति सूत्रेण पूर्वरूपे हु+इ+त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य, **णिश्रिद्रुस्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,हु +इ +अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्,**चङि** इति सूत्रेण धातोः द्वित्वे हु+हु+इ+अ+त् इति जाते, **पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **कुहोश्चुः** इति सूत्रेण अभ्यासहकारस्य झकारे झु+हु+इ+अ+त् इति जाते, **अभ्यासे चर्च** इति सूत्रेण झकारस्य जकारे जु+हु+इ+अ+त् इति जाते, **अचोञ्णिति** इति सूत्रेण वृद्धौ जु+हौ+इ +अ+त् इति जाते,**एचोयवायावः** इति सूत्रेण आयादेशे जु+हाव्+इ+अ+त् इति जाते, **काण्यादीनां वेति वक्तव्यम्** इति ह्रस्वस्य वैकल्पिकत्वेन तदभावे जु+हाव्+इ+अ+त् इति जाते, **णेरनिटि** इति सूत्रेण णिलोपे, जु+हाव्+अ+त् इति जाते, इति जाते, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अजुहावत्इति रूपं भवति।

**लोपः पिबतेरीच्चाभ्यासस्य**[13](7-4-4)

**अपीप्यत्**

पा पाने इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये पाधातोः णिच्प्रत्यये कृते,पा+इ इति जाते, **शाच्छासाह्वाव्यावेपां युक्** इति सूत्रेण युगागमे पायि इति णिजन्तस्य **सनाद्यन्ताधातवः** इति सूत्रेण णिजन्तस्य

---

[13]पिबतेः उपधायाः लोपः स्यात् अभ्यासस्य ईदन्तादेशश्च स्यात् चङ्परे णौ इति सूत्रार्थः।

धातुसंज्ञायाम्, **लूङ्** इति सूत्रेण धातोः लूङ्लकारे, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्प्रत्यये, पाय्+इ +तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,पाय् +इ +त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य, **णिश्रिद्रुस्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,पाय् +इ +अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्,**चङि** इति सूत्रेण धातोः द्वित्वे पाय्+पाय्+इ+अ+त् इति जाते, **पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **हलादिश्शेषः**इति सूत्रेण हलादिशेषेपा+पाय्+इ+अ+त् इति जाते,**लोपः पिबतेरीच्चाभ्यासस्य**इति सूत्रेण धातोरुपधायाः लोपे, अभ्यायस्य ईत्वे पी+प्य+इ+अ+त् इति जाते,**णेरनिटि** इति सूत्रेण णिलोपे, पी+प्य+अ+त् इति जाते, इति जाते, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अपीप्यत्इति रूपं भवति।

**अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ**[14](7-3-36)

**अर्पयति**

ऋ गतौ इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये ऋ+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे व्या+इ इति जाते **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ**इति सूत्रेण पुगागमे ऋप्+इ इति जाते,

[14]एषां पुगागमः स्यात् णौ परे इति सूत्रार्थः।

पुगन्तलघूपधस्य च इति सूत्रेण लघूपधगुणे अर्प+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण अर्पि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, अर्पि+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, अर्पि+ल् इति जाते, **तिप्तस्झिसिप्थस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिबादेशे, अर्पि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, अर्पि+शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, अर्पि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, अर्पे+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे अर्पयति इति रूपं भवति।

**ह्रेपयति**

ह्री लज्जायाम् इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये ह्री+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे ह्री+इ इति जाते **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** इति सूत्रेण पुगागमे ह्रीप्+इ इति जाते, **पुगन्तलघूपधस्य च** इति सूत्रेण लघूपधगुणे ह्रेप्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण ह्रेपि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, ह्रेपि +लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि

**तस्य लोपः** इति लोपे, ह्रेपि +ल् इति जाते, **तिप्तस्झिसिप्थस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिबादेशे, ह्रेपि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, ह्रेपि+शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, ह्रेपि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, ह्रेपे+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे ह्रेपयति इति रूपं भवति।

**व्लेपयति**

व्ली वरणे इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये व्ली+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे व्ली+इ इति जाते **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** इति सूत्रेण पुगागमे व्लीप्+इ इति जाते, **पुगन्तलघूपधस्य च** इति सूत्रेण लघूपधगुणे व्लेप् +इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण व्लेपि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, व्लेपि +लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, व्लेपि +ल् इति जाते, **तिप्तस्झिसिप्थस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिबादेशे, व्लेपि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, व्लेपि+शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति

सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, व्लेपि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, व्लेपे+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे व्लेपयति इति रूपं भवति।

**रेपयति**

रीगतिरेषणयोः इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये री+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे री+इ इति जाते **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** इति सूत्रेण पुगागमे रीप्+इ इति जाते, **पुगन्तलघूपधस्य च** इति सूत्रेण लघूपधगुणे रेप् +इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण रेपि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, रेपि +लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, रेपि +ल् इति जाते, **तिप्तस्झिसिप्तस्थ**---इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिबादेशे, रेपि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, रेपि+शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, रेपि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, रेपे+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे रेपयति इति रूपं भवति।

**क्नोपयति**

क्नूयी शब्दे इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये क्नूय्+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे क्नूय् +इ इति जाते, **लोपो व्योर्वलि** इति

सूत्रेण यलोपे क्नू+इ इति जाते, **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** इति सूत्रेण पुगागमे क्नूप्+इ इति जाते, **पुगन्तलघूपधस्य च** इति सूत्रेण लघूपधगुणे क्नोप् +इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण क्नोपि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, क्नोपि+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, क्नोपि +ल् इति जाते, **तिप्तस्झिसिप्थस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिबादेशे, क्नोपि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, क्नोपि+शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, क्नोपि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, क्नोपे+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे क्नोपयति इति रूपं भवति।

**क्ष्मापयति**

क्ष्मायी विधूनने इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये क्ष्माय्+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे क्ष्माय् +इ इति जाते, **लोपो व्योर्वलि** इति सूत्रेण यलोपे क्ष्मा+इ इति जाते, **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** इति सूत्रेण पुगागमे क्ष्माप्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण क्ष्मापि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, क्ष्मापि+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति

सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, क्ष्मापि +ल् इति जाते, **तिप्तस्झिसिप्थस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिबादेशे, क्ष्मापि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, क्ष्मापि+शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, क्ष्मापि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, क्ष्मापे+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे क्ष्मापयति इति रूपं भवति।

**स्थापयति**

ष्ठा गतिनिवृत्तौ इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये स्था+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे स्था+इ इति जाते, **लोपो व्योर्वलि** इति सूत्रेण यलोपे स्था+इ इति जाते, **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** इति सूत्रेण पुगागमे स्थाप्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण स्थापि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, स्थापि+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, स्थापि+ल् इति जाते, **तिप्तस्झिसिप्थस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिबादेशे, स्थापि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, स्थापि +शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति

इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, स्थापि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, स्थापे+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे स्थापयति इति रूपं भवति।

**तिष्ठतेरित्**[15](7-4-5)

**अतिष्ठिपत्**

ष्ठा गतिनिवृत्तौ इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये स्थाधातोः णिच्प्रत्यये कृते,स्था+इ इति जाते, **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** इति सूत्रेण पुगागमे स्थाप्+इ इति जाते, स्थापि इति णिजन्तस्य **सनाद्यन्ताधातवः** इति सूत्रेण णिजन्तस्य धातुसंज्ञायाम्, **लुङ्** इति सूत्रेण धातोः लुङ्लकारे, **तिप्तस्झि---**-इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्रत्यये, स्थाप्+इ+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,स्थाप् +इ +त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य, **णिश्रिद्रुस्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,स्थाप्+इ +अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्,**तिष्ठतेरित्** इति सूत्रेणधातोरुपधायः इदादेशे स्थिप्+इ+अ+त् इति जाते,**चङि** इति सूत्रेण धातोः द्वित्वे स्थिप्+स्थिप् +इ+अ+त् इति जाते, **पूर्वोऽभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **शर्पूर्वाःखयः**इति

---

[15]स्थाधातोरुपधायाः इदादेशः स्यात् चङ्परे णौ इति सूत्रार्थः।

सूत्रेण थकारस्य शेषे थि+स्थिप् +इ+अ+त् इति जाते, **अभ्यासे चर्च** इति सूत्रेण थकारस्य चर्त्वेन तकारेति+स्थिप् +इ+अ+त् इति जाते,**णेरनिटि** इति सूत्रेण णिलोपे, ति+स्थिप्+इ+त् इति जाते,**आदेशप्रत्यययोः** इति सूत्रेण आदेशसकारस्य षत्वे ति+ष्थिप् +अ+त् इति जाते, **ष्टुना ष्टुः** इति सूत्रेण थकारस्य ष्टुत्वे ठकारे ति+ष्ठिप् +अ+त्**लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अतिष्ठिपत्इति रूपं भवति।

**जिघ्रतेर्वा**[16](7-4-6)

**अजिघ्रिपत्**

घ्रा गन्धोपादाने इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये घ्राधातोः णिच्प्रत्यये कृते,घ्रा+इ इति जाते, **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** इति सूत्रेण पुगागमे घ्राप्+इ इति जाते, घ्रापि इति णिजन्तस्य **सनाद्यन्ताधातवः** इति सूत्रेण णिजन्तस्य धातुसंज्ञायाम्, **लुङ्** इति सूत्रेण धातोः लुङ्लकारे, **तिप्तस्झि----** इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, घ्राप्+इ+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,घ्राप् +इ +त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य, **णिश्रिद्रुस्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,घ्राप्+इ +अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, **जिघ्रतेर्वा** इति सूत्रेणधातोरुपधायः इदादेशे घ्रिप्+इ+अ+त् इति जाते,**चङि** इति सूत्रेण धातोः द्वित्वे घ्रिप्+घ्रिप् +इ+अ+त् इति

---

[16]घ्राधातोः उपधायाः इत् वा स्यात् चङ्परे णौ इति सूत्रार्थः।

जाते, **पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्,**हलादिश्शेषः** इति सूत्रेण हलादिश्शेषे घि+घ्रिप् +इ+अ+त् इति जाते, **कुहोश्चुः** इति सूत्रेण घकारस्य झकारे झि+घ्रिप् +इ+अ+त् इति जाते, **अभ्यासे चर्च** इति सूत्रेण झकारस्य चर्त्वेन जकारेजि+घ्रिप् +इ+अ+त् इति जाते,**णेरनिटि** इति सूत्रेण णिलोपे, जि+घ्रिप्+अ+त् इति जाते, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अजिघ्रिपत्इति रूपं भवति।

**अजिघ्रपत्**

घ्रा गन्धोपादाने इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये घ्राधातोः णिच्प्रत्यये कृते,घ्रा+इ इति जाते, **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** इति सूत्रेण पुगागमे घ्राप्+इ इति जाते, घ्रापि इति णिजन्तस्य **सनाद्यन्ताधातवः** इति सूत्रेण णिजन्तस्य धातुसंज्ञायाम्, **लुङ्** इति सूत्रेण धातोः लुङ्लकारे, **तिप्तस्झि----** इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्प्रत्यये, घ्राप्+इ+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,घ्राप् +इ +त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य, **णिश्रिद्रुस्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,घ्राप्+इ +अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, **जिघ्रतेर्वा** इति सूत्रेणविहितदीर्घस्य वैकल्पिकत्वेन तदभावेघ्रप्+इ+अ+त् इति जाते,**चङि** इति सूत्रेण धातोः द्वित्वे घ्रप्+घ्रप् +इ+अ+त् इति जाते, **पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्,**हलादिश्शेषः** इति सूत्रेण हलादिश्शेषे घ+घ्रप् +इ+अ+त् इति जाते, **कुहोश्चुः** इति सूत्रेण घकारस्य झकारे झ+घ्रप् +इ+अ+त् इति जाते, **अभ्यासे चर्च** इति सूत्रेण झकारस्य चर्त्वेन

जकारेज+घ्रप् +इ+अ+त् इति जाते,**सन्वल्लघुनि चङ्परेनग्लोपे** इति सूत्रेण सन्वद्भावे, **सन्यतः** इति सूत्रेण अभ्यासाकारस्य इत्वेजि+घ्रप् +इ+अ+त् इति जाते, **णेरनिटि** इति सूत्रेण णिलोपे, जि+घ्रप्+अ+त् इति जाते, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अजिघ्रपत्इति रूपं भवति।

**अचीकृतत्**

कृतसंशब्दने इत्यस्माद्धातोः **सत्यापपासरूपवीणातूल**इति सूत्रेण स्वार्थे णिचिकृत्+इ इति जाते, **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये कृत् धातोः णिच्प्रत्यये कृते,कृत्+इ+इ इति जाते,**णेरनिटि** इति सूत्रेण णिलोपे कृत्+इ,**उर्ऋत् इति** सूत्रेण ऋकारस्य ऋकारे कृत्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण णिजन्तस्य धातुसंज्ञायाम्,**लुङ्** इति सूत्रेण धातोः लुङ्लकारे, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, कृत्+इ+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,कृत्+इ+त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य, **णिश्रिद्रुस्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,कृत्+इ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, **चङि** इति सूत्रेण धातोः द्वित्वे कृत्+कृत् +इ+अ+त् इति जाते, **पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्,**हलादिश्शेषः** इति सूत्रेण हलादिश्शेषे कृ+कृत् +इ+अ+त् इति जाते, **कुहोश्चुः** इति सूत्रेण ककारस्य चकारे चृ+कृत् +इ+अ+त् इति जाते, **उरत्** इति सूत्रेण अभ्यास ऋवर्णस्यात्वे रपरत्वे, चर्+कृत् +इ+अ+त् इति जाते, पुनः हलादिश्शेषे च+कृत् +इ+अ+त् इति

जाते,**सन्वल्लघुनि चङ्परेऽनग्लोपे** इति सूत्रेण सन्वद्भावे, **सन्यतः** इति सूत्रेण अभ्यासाकारस्य इत्वेचि+कृत् +इ+अ+त् इति जाते, दीर्घो लघोः इति सूत्रेण दीर्घे ची+कृत् +इ+अ+त् इति जाते, **णेरनिटि** इति सूत्रेण णिलोपे**लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अचीकृतत्इति रूपं भवति।

**अचिकीर्तत्**

कृत संशब्दने इत्यस्माद्धातोः **सत्यापपासरूपवीणातूल** इति सूत्रेण स्वार्थे णिचि कृत्+इ इति जाते, **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये कृत् धातोः णिच्प्रत्यये कृते,कृत्+इ+इ इति जाते, **णेरनिटि** इति सूत्रेण णिलोपे कृत्+इ, **उर्ऋत् इति** सूत्रस्य वैकल्पिकत्वेन तद्भावे, **उपधायाश्च** इति सूत्रेण इत्वे रपरत्वेकिर्त्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण णिजन्तस्य धातुसंज्ञायाम्, **लुङ्** इति सूत्रेण धातोः लुङ्लकारे, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्प्रत्यये, किर्त्+इ+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,किर्त् +इ+त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य, **णिश्रिदुस्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,किर्त् +इ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, **चङि** इति सूत्रेण धातोः द्वित्वे किर्त्+किर्त्+इ+अ+त् इति जाते, **पूर्वोऽभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **हलादिश्शेषः** इति सूत्रेण हलादिश्शेषे कि+किर्त् +इ+अ+त् इति जाते, **कुहोश्चुः** इति सूत्रेण ककारस्य चकारे चि+किर्त्+इ+अ+त् इति जाते,**णेरनिटि** इति सूत्रेण णिलोपे,**उपधायां च** इति सूत्रेण इति सूत्रेणधातोः उपधारेफात् पूर्वस्य दीर्घे

चि+कीर्त्+अ+त् इति जाते,**लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अचिकीर्ततइति रूपं भवति।

**अवीवृतत्**

वृतु वर्तने इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये वृत् धातोः णिच्प्रत्यये कृते,वृत्+इ इति जाते, **उर्ऋत् इति** सूत्रणे ऋकारे वृत्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण णिजन्तस्य धातुसंज्ञायाम्, **लुङ्** इति सूत्रेण धातोः लुङ्लकारे, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, वृत्+इ+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,वृत् +इ+त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य, **णिश्रिदुश्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,वृत्+इ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, **चङि** इति सूत्रेण धातोः द्वित्वे वृत्+वृत्+इ+अ+त् इति जाते, **पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **हलादिश्शेषः** इति सूत्रेण हलादिश्शेषे वृ+वृत् +इ+अ+त् इति जाते, **उरत्** इति सूत्रेण अभभ्यात्रृवर्णस्य अत्वे रपरत्वे चकारे वर्+वृत् +इ+अ+त् इति जाते,पुनः हलादिश्शेषे, **सन्वल्लघुनिचङ्परेनग्लोपे** इति सूत्रेण सन्वद्भावे, **सन्यतः** इति सूत्रेण अभ्यासाकारस्य इत्वेवि+वृत् +इ+अ+त् इति जाते, **दीर्घो लघोः** इति सूत्रेण दीर्घे वी+वृत् +इ+अ+त् इति जाते, **णेरनिटि** इति सूत्रेण णिलोपे, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अवीवृततइति रूपं भवति।

**अववर्तत्**

वृतु वर्तने इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये वृत् धातोः णिच्प्रत्यये कृते,वृत्+इ इति जाते, **पुगन्तलघूपधस्य च** इतिसूत्रणे लघूपधगुणे वर्त्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण णिजन्तस्य धातुसंज्ञायाम्, **लूङ्** इति सूत्रेण धातोः लूङ्लकारे, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, वर्त् +इ+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,वर्त्+इ+त् इति जाते, **च्लि लूङि** इति सूत्रेण धातोः लूङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य, **णिश्रिद्रुस्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,वर्त् +इ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, **चङि** इति सूत्रेण धातोः द्वित्वेवर्त् +वर्त्+इ+अ+त् इति जाते, **पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **हलादिश्शेषः** इति सूत्रेण हलादिश्शेषे व+वर्त्+इ+अ+त् इति जाते, **णेरनिटि** इति सूत्रेण णिलोपे व+वर्त्+अ+त् इति जाते,, **लूङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अववर्तत्इति रूपं भवति।

**अमीमृजत्**

मृजूष् शुद्धौ इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये मृज् धातोः णिच्प्रत्यये कृते,मृज्+इ इति जाते, **उर्ऋत् इति** सूत्रणे ऋकारे मृज्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण णिजन्तस्य धातुसंज्ञायाम्, **लूङ्** इति सूत्रेण धातोः लूङ्लकारे, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, मृज्+इ+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,मृज् +इ+त् इति जाते, **च्लि लूङि**

इति सूत्रेण धातोः लृङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य, **णिश्रिदुश्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,मृज्+इ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, **चङि** इति सूत्रेण धातोः द्वित्वे मृज्+मृज्+इ+अ+त् इति जाते, **पूर्वोभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **हलादिश्शेषः** इति सूत्रेण हलादिश्शेषे मृ+मृज्+इ+अ+त् इति जाते, **उरत्** इति सूत्रेण अभम्यात्रऋवर्णस्य अत्वे रपरत्वे चकारे मर्+मृत्+इ+अ+त् इति जाते,पुनः हलादिश्शेषे, **सन्वल्लघुनिचङ्परेनग्लोपे** इति सूत्रेण सन्वद्भावे, **सन्यतः** इति सूत्रेण अभ्यासाकारस्य इत्वेमि+मृज्+इ+अ+त् इति जाते, **दीर्घो लघोः** इति सूत्रेण दीर्घे मी+मृज् +इ+अ+त् इति जाते, **णेरनिटि** इति सूत्रेण णिलोपे मी+मृज्+अ+त् इति जाते,, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अमीमृजत्इति रूपं भवति।

**पातेर्णौलुग्वक्तव्यः**

**पालयति**

पा रक्षणे इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये स्था+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे स्था+इ इति जाते, **पातेर्णौलुग्वक्तव्यः** इति वार्तिकेन लुगागमे पाल्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण स्थापि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, पालि+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, पालि+ल् इति

जाते, **तिप्तस्झिसिप्तस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिबादेशे, पालि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, पालि +शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, पालि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, पाले+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे पालयति इति रूपं भवति।

**वो विधूननेजुक्**[17](7-3-38)

**वाजयति**

वा गतिगन्धनयोः इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये स्था+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे स्था+इ इति जाते, **वो विधूननेजुक्** इति सूत्रेण कम्पनार्थकस्य वाधातोःजुगागमे वाज्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण स्थापि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, वाजि+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, वाजि+ल् इति जाते, **तिप्तस्झिसिप्तस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिबादेशे, वाजि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण

---

[17]वातेः जुक् स्यात् णौ परे कम्पे अर्थे इति सूत्रार्थः।

सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, वाजि +शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, वाजि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, वाजे+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे वाजयति इति रूपं भवति।

कम्पनभिन्नार्थे **तुअर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** इति सत्रेण पुगेव कैशान्वापयति=सुगन्धीकरोति इत्येव रूपम्।

**लीलोर्नुग्लूकावन्यतरस्यां स्नेहनिपातने**[18](7-3-38)

**विलीनयति**

वि इत्युपसर्गपूर्वाकात् लीङ् श्लेषणे इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये विली+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे विली+इ इति जाते, **लीलोर्नुग्लूकावन्यतरस्याम्** इति सूत्रेण नुगागमे विलीन्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण स्थापि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, विलीनि+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, विलीनि+ल् इति जाते, **तिप्तस्झिसिप्थस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिबादेशे, विलीनि+ति इति जाते, **तिङ्शित्सार्वधातुकम्**

---

[18]लीयतेर्लातेश्च कर्मात् लूक् नुक् आगमौ स्तः णौ परे स्नेहद्रवे इति सूत्रार्थः।

इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, विलीनि +शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, विलीनि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, लीने+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे विलीनयति इति रूपं भवति।

**विलाययति**

वि इत्युपसर्गपूर्वाकात् लीङ् श्लेषणे इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये विली+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे विली+इ इति जाते, **लीलोर्नुग्लूकावन्यतरस्ये स्नेहनिपातने** इति सूत्रेण नुगागमाभावपक्षे **अचोञ्णिति** इति सूत्रेण वृद्धौविलै+इ इति जाते, **एचोयवायावः** इति सूत्रेण आयादेशे विलाय्+इ इति जाते, विलायि इति णिजन्तस्य**सनाद्यन्ताधातवः** इति सूत्रेण धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, विलाय्+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, विलाय्+ल् इति जाते, **तिप्तस्झिसिप्थस्थ-**---इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिबादेशे, विलाय्+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, विलाय्+शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, विलाय्+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति

सूत्रेण गुणे, विलाये+अ+ति इति जाते,**एचोयवायावः** इति सूत्रेण अयादेशे विलाययति इति रूपं भवति।

SRI CHANDRASEKHARENDRA SARASWATHI VISWA MAHAVIDYALAYA ★ KANCHEEPURAM ★ SCSVMV

**विलालयति-घृतम्**

वि इत्युपसर्गपूर्वाकात् लीङ् श्लेषणे इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये विली+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे विली+इ इति जाते,**विभाषा लीयतेः** इति सूत्रेण लीधातोः एज्विषये आत्वे विला+इ इति जाते,**लीलोर्नुग्लूकावन्यतरस्याम्** इति सूत्रेण लूगागमे विलाल्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण विलालि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, विलालि+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, विलालि+ल् इति जाते, **तिप्तस्झिसिप्तस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिबादेशे, विलालि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, विलालि+शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, विलालि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, विलाले+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे विलालयति इति रूपं भवति।

**विलापयति-घृतम्**

वि इत्युपसर्गपूर्वाकात् लीङ् श्लेषणे इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये विली+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्,

णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे विली+इ इति जाते, **विभाषा लीयतेः** इति सूत्रेण लीधातोः एज्विषये आत्वे विला+इ इति जाते, **लीलोर्नुग्लूकावन्यतरस्याम्** इति सूत्रविहितलूगागमस्य वैकल्पिकत्वेन तद्भावे **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** इति सूत्रेण पुगागमे विलाप्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण विलापि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, विलालि+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, विलापि+ल् इति जाते, **तिप्तस्झिसिप्तस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिबादेशे, विलापि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, विलापि+शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, विलापि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, विलापे+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे विलापयति इति रूपं भवति।

**लियः संमाननशालिनीकरणयोश्च**[19](1-3-70)

**जटाभिः लापयते(पूजामधिगच्छतीत्यर्थः)**

वि इत्युपसर्गपूर्वाकात् लीङ् श्लेषणे इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये विली+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे विली+इ इति जाते, **प्रलम्भवनाभिभवपूजासु लियो नित्यमात्वमशिति वाच्यम्** इति वार्तिकेम लीधातोः आत्वे विला+इ इति जाते, **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** इति सूत्रेण पुगागमे विलाप्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण विलापि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, विलालि+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, विलापि+ल् इति जाते, **लियः संमाननशालिनीकरणयोश्च** इति सूत्रेण लीधातोः ण्यन्तादात्मनेपदे, **तिप्तस्झिसिप्तस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तादेशे, विलापि+त इति जाते,**टित आत्मनेपदानां टेरे** इति सूत्रेण टेः एत्वे विलापि+ते इति जाते,**तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, विलापि+शप्+ते इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः**

---

[19]लीङ्लियोः ण्यन्तयोः आत्मनेपदं स्यात् अकर्तृकेपि फले पूजाभिभवयोः प्रलम्भने चार्थे इति सूत्रार्थः।

इति सूत्रेण इत्संज्ञायाम्, विलापि+अ+ते इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, विलापे+अ+ते इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे विलापयते इति रूपं भवति।

**श्येनो नार्तिकाम् उल्लापयते (अभिभवतीत्यर्थः)**

उद् इत्युपसर्गपूर्वाकात् लीङ् श्लेषणे इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये उद्ली+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे उद्ली+इ इति जाते, **प्रलम्भवनाभिभवपूजासु लियो नित्यमात्वमशिति वाच्यम्** इति वार्तिकेम लीधातोः आत्वे उद्ला+इ इति जाते, **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** इति सूत्रेण पुगागमे उद्लाप्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण उद्लापि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, उद्लापि+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, उद्लापि+ल् इति जाते, **लियः संमाननशालिनीकरणयोश्च** इति सूत्रेण लीधातोः ण्यन्तादात्मनेपदे, **तिप्तस्झिसिप्थस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तादेशे, उद्लापि+त इति जाते, **टित आत्मनेपदानां टेरे** इति सूत्रेण टेः एत्वे उद्लापि+ते इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, उद्लापि+शप्+ते इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, उद्लापि+अ+ते इति जाते, **सार्वधातुकार्धधातुकयोः** इति

सूत्रेण गुणे, उद्लापे+अ+ते इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे उद्+ लापयते इति जाते, **तोर्लि** इति सूत्रेण दकारस्य परसवर्णे लकारे उल्लापयते इति रूपं भवति।

**बालम् उल्लापयते(वञ्चतीत्यर्थः)**

उद् इत्युपसर्गपूर्वाकात् लीङ् श्लेषणे इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये उद्ली+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे उद्ली+इ इति जाते, **प्रलम्भवनाभिभवपूजासु लियो नित्यमात्वमशिति वाच्यम्** इति वार्तिकेम लीधातोः आत्वे उद्ला+इ इति जाते, **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** इति सूत्रेण पुगागमे उद्लाप्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण उद्लापि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, उद्लापि+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, उद्लापि+ल् इति जाते, **लियः संमाननशालिनीकरणयोश्च** इति सूत्रेण लीधातोः ण्यन्तादात्मनेपदे, **तिप्तस्झिसिप्थस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तादेशे, उद्लापि+त इति जाते, **टित आत्मनेपदानां टेरे** इति सूत्रेण टेः एत्वे उद्लापि+ते इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, उद्लापि+शप्+ते इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, उद्लापि+अ+ते इति जाते, **सार्वधातुकार्धधातुकयोः** इति

सूत्रेण गुणे, उद्लापे+अ+ते इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे उद्+ लापयते इति जाते, **तोर्लि** इति सूत्रेण दकारस्य परसवर्णे लकारे उल्लापयते इति रूपं भवति।

**बिभेतेर्हेतुभये**[20](6-1-56)

**भीस्मयोर्हेतुभये**[21](1-3-38)

**मुण्डो भापयते**

ञि भी भये इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये भी+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे उद्ली+इ इति जाते, **बिभेतेर्हेतुभये** इति सूत्रेण भीधातोः हेतोः भये एज्विषये आत्वे भा+इ इति जाते, **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** इति सूत्रेण पुगागमे भा+प्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण भापि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, भापि+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, भापि+ल् इति जाते, **भीस्मयोर्हेतुभये**इति सूत्रेण भीधातोः ण्यन्तादात्मनेपदे, **तिप्तस्झिसिप्थस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तादेशे, भापि+त इति जाते, **टित आत्मनेपदानां टेरे** इति सूत्रेण टेः एत्वे भापि+ते इति जाते, **तिङ्शित्सार्वधातुकम्**

---

[20]बिभेतेरेचः आत्वं वा स्यात् प्रयोजकात् भयं चेत् इति सूत्रार्थः।

[21]आभ्यां ण्यन्ताभ्यामात्मनेपदं स्यात् हेतोश्चेत् भयस्मयौ इति सूत्रार्थः।

इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, भापि+शप्+ते इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, भापि+अ+ते इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, भापे+अ+ते इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे भापयते इति रूपं भवति।

**भियो हेतुभये षुक्**[22] (7-3-40)

**भीषयते**

ञि भी भये इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये भी+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे भी+इ इति जाते, **भियो हेतुभये षुक् च**इति सूत्रेण भीधातोः षुगागमे भीष्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण भीषि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, भीषि+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, भीषि+ल् इति जाते, **भीस्मयोर्हेतुभये** इति सूत्रेण भीधातोः ण्यन्तादात्मनेपदे, **तिप्तस्झिसिप्थस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तादेशे, भीषि+त इति जाते, **टित आत्मनेपदानां टेरे** इति सूत्रेण टेः एत्वे भीषि+ते इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे,

---

[22]ईकारान्तस्य भिञः षुक् स्यात् णौ हेतुभये इति सूत्रार्थः।

भीषि+शप्+ते इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, भीषि+अ+ते इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, भीषे+अ+ते इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे भाषयते इति रूपं भवति।

**नित्यं स्मयतेः**[23](6-1-57)

**जटिलो विस्मापयते**

विपूर्वकात् ष्मिङ् ईषद्धसने इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये विस्मि+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे विस्मि+इ इति जाते, **नित्यं स्मयतेः** इति सूत्रेण स्मये स्मिधातोः एज्विषये आत्वे विस्मा+इ इति जाते, **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** इति सूत्रेण पुगागमे विस्मा+प्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण स्मापि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, विस्मापि+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, विस्मापि+ल् इति जाते, **भीस्मयोर्हेतुभये** इति सूत्रेण भीधातोः ण्यन्तादात्मनेपदे, **तिप्तस्झिसिप्तस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तादेशे, विस्मापि+त इति जाते, **टित आत्मनेपदानां टेरे** इति सूत्रेण टेः एत्वे स्मापि+ते इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्,

---

[23]स्मयतेरेचः नित्यमात्वं स्यात् इति सूत्रार्थः।

**कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, विस्मापि+शप्+ते इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, विस्मापि+अ+ते इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, विस्मापे+अ+ते इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे विस्मापयते इति रूपं भवति।

**कथं तर्हि विस्मापयन् विस्मितमात्मवृत्तौ इति**

विपूर्वकात् ष्मिङ् ईषद्धसने इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये विस्मि+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे विस्मि+इ इति जाते, **नित्यं स्मयतेः** इति सूत्रेण स्मये स्मिधातोः एज्विषये आत्वे विस्मा+इ इति जाते, **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** इति सूत्रेण पुगागमे विस्मा+प्+इ इति जाते,**हेतुमति च** इति सूत्रेण णिजन्तात् स्मापिधातोः पुनः णिचि विस्मा+प्+इ+इ इति जाते,**णेरनिटि** इति सूत्रेण णेः लोपे विस्माप्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण विस्मापि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, विस्मापि+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, विस्मापि+ल् इति जाते,**लटः शतृशानचावप्रथमासमानिधिकरणे** इति सूत्रेण लटः शत्रादेशे विस्मापि+अत् इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, विस्मापि+शप्+अत् इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते**

इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, विस्मापि+अ+अत् इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, विस्मापे+अ+अत् इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे विस्मापयत् इति जाते, समुदायात् सुविभक्तौ विस्मापयत्+सु इति जाते, **उगिदचां सर्वनामस्थानेधातोः** इति सूत्रेण नुमागमे विस्मापयन्त्+सु इति जाते, **हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्** इति सूत्रेण सोः लोपे विस्मापयन्त् इति जाते, **सं.गान्तस्य लोपः** इति सूत्रेण संयोगान्तलोपे विस्मापयन् इति रूपं भवति।

**स्फायो वः**[24](7-3-41)

**स्फावयति**

स्फायी वृद्धौ इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये विस्मि+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे स्फाय्+इ इति जाते, **स्फायो वः** इति सूत्रेण स्फाय्धातुगतयकारस्य वकारादेशे स्फाव्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण स्फावि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, स्फावि+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, स्फावि +ल् इति जाते, **तिप्तस्झिसिप्थस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिपि, स्फावि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण

---

[24]स्फायी वद्धौ इत्यस्य धातोः वकारादेशः स्यात् णौ परे इति सूत्रार्थः।

सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, स्फावि+शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, स्फावि +अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, स्फावे+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे स्फावयति इति रूपं भवति।

**शदेरगतोः तः**[25](7-3-42)

**शातयति**

शद् शातने इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये शद्+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे शद्+इ इति जाते, **शदेरगतोः तः**इति सूत्रेण गतिभिन्नार्थशदधातुगतदकारस्य तकारादेशे शत्+इ इति जाते,**अत उपधायाः** इति सूत्रेण उपधावृद्धौ शात्+इ इति जाते,**सनाद्यन्ताधातवः** इति सूत्रेण शाति इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, शाति+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, शाति+ल् इति जाते, **तिप्तस्झिसिप्तस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिपि, शाति+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, शाति+शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति

---

[25]शदेः णौ तः अन्तादेशः स्यात् न तु गतौ इति सूत्रार्थः।

इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, शाति+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, शाते+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे शातयति इति रूपं भवति।

**गतौ तु गाः शादयति गोविन्दः। गमयतीत्यर्थः।**

शद् शातने इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये शद्+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे शद्+इ इति जाते, **अत उपधायाः** इति सूत्रेण उपधावृद्धौ शाद्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण शादि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, शादि+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, शादि+ल् इति जाते, **तिप्तस्झिसिप्तस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिपि, शादि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, शादि+शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, शादि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, शादे+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे शादयति इति रूपं भवति।

**रुहः पोन्यतरस्याम्**[26](7-3-43)

**रोपयति**

रुह बीजजन्मनि प्रादुर्भावे च इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये रुह्+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे रुह्+इ इति जाते, **रुहः पोन्यतरस्याम्**इति सूत्रेण रुहधातुगतहकारस्य पकारादेशे रुप्+इ इति जाते, **पुगन्तलघूपधस्य च** इति सूत्रेण पुगन्तगुणे रोप्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण रोपि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, रोपि+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, रोपि+ल् इति जाते, **तिप्तस्झिसिप्थस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिपि, रोपि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, रोपि+शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, रोपि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, रोपे+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे रोपयति इति रूपं भवति।

**रोहयति**

---

[26]णौ परे रुहः पः स्यात् इति सूत्रार्थः।

रुह बीजजन्मनि प्रादुर्भावे च इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये रुह्+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे रुह्+इ इति जाते, **रुहः पोन्यतरस्याम्**इति सूत्रेण विहितस्य पकारादेशस्य वैकल्पिकत्वेन तदभावे रुह्+इ इति जाते, **पुगन्तलघूपधस्य च** इति सूत्रेण पुगन्तगुणे रोह्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण रोपि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, रोहि+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, रोहि+ल् इति जाते, **तिप्तस्झिसिप्थस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिपि, रोहि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, रोहि +शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, रोहि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, रोहे+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे रोहयति इति रूपं भवति।

**क्रीङ्जीनां णौ**[27](7-3-48)

**क्रापयति**

---

[27]डुक्रीञ् द्रव्यविनिमये, इङ् अध्ययने, जि जये इत्येतेषां धातूनां आत्वं स्यात् णौ परे इति सूत्रार्थः।

डुक्रीञ् द्रव्यविनिमये इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये क्री+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे क्री+इ इति जाते, **क्रीङ्जीनां णौ** इति सूत्रेण आत्वेक्रा+इ इति जाते, **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** इति सूत्रेण पुगागमे**अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** इति सूत्रेण पुगागमेक्राप्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण क्रापि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, क्रापि+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, क्रापि+ल् इति जाते, **तिप्तस्झिसिप्थस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिपि, क्रापि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, क्रापि +शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, क्रापि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, क्रापे+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे क्रापयति इति रूपं भवति।

**जापयति**

जि जये इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये जि+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे जि+इ इति जाते, **क्रीङ्जीनां णौ** इति सूत्रेण आत्वे जा+इ इति जाते, **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** इति सूत्रेण पुगागमे

**अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** इति सूत्रेण पुगागमेजाप्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण जापि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, जापि+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, जापि+ल् इति जाते, **तिप्तस्झिसिप्थस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिपि, जापि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, जापि +शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, जापि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, जापे+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे जापयति इति रूपं भवति।

**अध्यापयति**

अधिपूर्वाकात् इङ् अध्ययने(इङ् धातुःनित्यमधिपूर्वः) इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये अधि+इ+णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे अधि+इ+इ इति जाते, **क्रीङ्जीनां णौ** इति सूत्रेण आत्वे अधि+आ+इ इति जाते, **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** इति सूत्रेण पुगागमेअधि+आप्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण अध्यापि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, अधि+आपि+लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य

इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, अधि+आपि+ल् इति जाते, **तिप्तस्झिसिप्थस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिपि, अधि+आपि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, अधि+आपि+शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते**इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, अधि+आपि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, अधि+आपे+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे अधि+आपयतिइति जाते **इको यणचि** इति सूत्रेण यणादेशे अध्यापयति इति रूपं भवति।

**णौ च संश्चङोः**[28](2-4-51)

**अध्यजीगपत्**

अधिपूर्वाकात् इङ् अध्ययने(इङ् धातुःनित्यमधिपूर्वः) इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये इङ् धातोः णिच्प्रत्यये कृते,अधि+इ+इ इति जाते, **णौ च संश्चङोः** सूत्रणे इङः गाङादेशे अधि+गा+इ इति जाते, **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** इति सूत्रेण पुगागमे अधि+गाप्+इ इति जाते,, **सनाद्यन्ताधातवः** इति सूत्रेण णिजन्तस्य धातुसंज्ञायाम्, **लूङ्** इति सूत्रेण धातोः लूङ्लकारे, **तिप्तस्झि**----इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, अधि+गाप्+इ+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च**

---

[28]सन्परे चङ्परे च णौ इङः गाङ् वा स्यात् इति सूत्रार्थः।

इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,अधि+गाप्+इ+त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य, **णिश्रिद्रुस्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,अधि+गाप्+इ+अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्,**णौ चङ्युपधाया ह्रस्वः** इति सूत्रेण उपधाह्रस्वे अधि+गप् +इ+अ+त् इति जाते,**चङि** इति सूत्रेण धातोः द्वित्वे अधि+गप्+गप्+इ+अ+त् इति जाते, **पूर्वोऽभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्, **हलादिश्शेषः** इति सूत्रेण हलादिश्शेषे अधि+ग+गप्+इ+अ+त् इति जाते, **कुहोश्चुः**इति सूत्रेण अभ्यासगकारस्य चुत्वेन गकारेअधि+ज+गप्+इ+अ+त् इति जाते,पुनः हलादिश्शेषे, **सन्वल्लघुनिचङ्परेऽनग्लोपे** इति सूत्रेण सन्वद्भावे, **सन्यतः** इति सूत्रेण अभ्यासाकारस्य इत्वेअधि+जि+गप्+इ+अ+त्इति जाते, **दीर्घो लघोः** इति सूत्रेण दीर्घे अधि+जी+गप्+इ+अ+त् इति जाते, **णेरनिटि** इति सूत्रेण णिलोपे,अधि+जी+गप्+अ+त् इति जाते,**लुङ्लङ्लृङ्क्ष्वडुदात्तः** इति सूत्रेण धातोः अडागमे अधि+अजीगपत् इति जाते, **इको यणचि** इति सूत्रेण यणादेशेअध्यजीगपत्इति रूपं भवति।

**अध्यापिपत्**

अधिपूर्वाकात् इङ् अध्ययने(इङ् धातुःनित्यमधिपूर्वः) इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण प्रयोजकव्यापारे वाच्ये इङ् धातोः णिच्प्रत्यये कृते,अधि+इ+इ इति जाते, **क्रीङ्जीनां णौ** इति सूत्रेण आत्वे अधि+आ+इ इति जाते, **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** इति सूत्रेण पुगागमे अधि+आप्+इ इति जाते,,

**सनाद्यन्ताधातवः** इति सूत्रेण णिजन्तस्य धातुसंज्ञायाम्, **लूङ्** इति सूत्रेण धातोः लूङ्लकारे, **तिप्तस्झि----**इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्त्यये, अधि+आप्+इ+तिप् इति जाते, पकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, **इतश्च** इति सूत्रेण इकारस्य इत्संज्ञायाम्, उभयोरपि तस्य लोपे,अधि+आप्+इ+त् इति जाते, **च्लि लुङि** इति सूत्रेण धातोः लुङि, **च्लेः सिच्** इति सूत्रेण सिजादेशे प्राप्ते तं प्रबाध्य, **णिश्रिदुश्रुभ्यः कर्तरि चङ्** इति सूत्रेण चङादेशे, इत्संज्ञालोपयोः कृतयोः,अधि+आप्+इ+अ+त् इति जाते, **आर्धधातुकं शेषः** इति सूत्रेण चङः आर्धधातुकसंज्ञायाम्, **णौ चङ्युपधाया ह्रस्वः** इति सूत्रेण उपधाह्रस्वे अधि+अप् +इ+अ+त् इति जाते, **चङि** इति सूत्रेण धातोः द्वित्वे अधि+अपि+पि +अ+त् इति जाते, **पूर्वोऽभ्यासः** इति सूत्रेण प्रथमखण्डस्य अभ्याससंज्ञायाम्,**णेरनिटि** इति सूत्रेण णिलोपे,अधि+अपि+प्+अ+त् इति जाते, **आडजादीनाम्** इति सूत्रेण अङ्गस्य अडागमे अधि+आ+अपि+प्+अ+त् इति जाते,**आटश्च** इति सूत्रेण वृद्धौ अधि+आपिपत् इति जाते **इको यणचि** इति सूत्रेण यणादेशे अध्यापिपतइति रूपं भवति।

**सिध्यतेरपारलोकिके**[29](6-1-49)

**अन्नं साधयति**

षिधु संराद्धौ इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये सिधु+ णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण

---

[29]ऐहलौकिके अर्थे विद्यमानस्य सिध्यतेरेचः आत्वं स्यात् णौ परे इति सूत्रार्थः।

इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे सिधु+इ इति जाते, **पुगन्तलघूपधस्य च** इति सूत्रेण गुणे सेध्+इ इति जाते, **सिध्यतेरपारलौकिके** इति सूत्रेण एचः आत्वेसाध्+ इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण साधि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, साधि+ लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, साधि+ ल् इति जाते, **तिप्तस्झिसिप्तस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिपि, साधि +ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, साधि+ शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, अधि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, साधे+ अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे साधयति इति रूपं भवति।

अपारलौकिके तु **साधयतितापसं** तपः

षिधु संराद्धौ इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये सिधु+ णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे सिधु+इ इति जाते, **पुगन्तलघूपधस्य च** इति सूत्रेण गुणे सेध्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण सेधि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, सेधि+ लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण

लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, सेधि+ ल् इति जाते, **तिप्तस्झिसिप्तस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिपि, सेधि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, सेधि+ शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, सेधि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, सेधे+ अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे सेधयति इति रूपं भवति।

**प्रजने वीयतेः**[30](6-1-55)

**वापयति(गाः पुरोवातः)**

वी गतिव्याप्तिप्रजनकान्त्यसनखादनखादनेषु इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये वी+ णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे वी+इ इति जाते, **प्रजने वीयतेः** इति सूत्रेण आत्वे वा+इ इति जाते, **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** इति सूत्रेण पुगागमेवाप्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण वापि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, वापि+ लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, वापि+ल् इति

---

[30]अस्यैचः आत्वं वा स्यात् णौ प्रजने अर्थे इति सूत्रार्थः।

जाते, **तिप्तस्झिसिप्थस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिपि, वापि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, वापि+ शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, वापि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, वापे+ अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे वापयति इति रूपं भवति।

**प्रजने वीयतेः** इति सूत्रेण विहितस्य आत्वस्य वैकल्पिकत्वेन तद्भावे-

**वाययति(गाः पुरोवातः)**

वी गतिव्याप्तिप्रजनकान्त्यसनखादनखादनेषु इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये वी+ णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे वी+इ इति जाते, **अचोञ्णिति** इति सूत्रेण वृद्धौ वै+इ इति जाते, **एचोयवायावः** इति सूत्रेण आयादेशेवाय्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण वायि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, वायि+ लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, वायि+ल् इति जाते, **तिप्तस्झिसिप्तस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिपि, वायि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, वायि+ शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, वायि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, वाये+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे वाययति इति रूपं भवति।

**गूहयति**

गुहू संवरणे इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये वी+ णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण

इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे गुह्+इ इति जाते, **पुगन्तलघूपधस्य च** इति सूत्रेण गुणे गोह्+इ इति जाते, **ऊदुपधाया गोहः** इति सूत्रेण गुहधातोरुपधायाः ऊकारेगूह्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण वापि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, गूहि+ लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, वापि+ल् इति जाते, **तिप्तस्झिसिप्तस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिपि, गूहि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, गूहि+शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, गूहि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, गूहे+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे गूहयति इति रूपं भवति।

**दोषो णौ**[31](6-4-90)

**दूषयति**

दुषवैकल्ये इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये दुष्+ णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे दुष्+इ इति जाते, **पुगन्तलघूपधस्य च**

---

[31]दुष्यतेरुपधायाः ऊत्स्यात् इति सूत्रार्थः।

इति सूत्रेण गुणे दोष्+इ इति जाते, **दोषो णौ** इति सूत्रेणदुषधातोरुपधायाः ऊकारेदूष्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण दूषि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, दूषि+ लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, दूषि+ल् इति जाते, **तिप्तस्झिसिप्तस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिपि, दूषि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, दूषि+शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, दूषि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, दूषे+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे दूषयति इति रूपं भवति।

**वा चित्तविरागे**[32](6-4-91)

**दूषयति चित्तम्**

दुष वैकल्ये इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये दुष्+ णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे दुष्+इ इति जाते, **पुगन्तलघूपधस्य च** इति सूत्रेण गुणे दोष्+इ इति जाते, **वा चित्तविरागे** इति सूत्रेण दुषधातोरुपधायाः

---

[32]चित्तविरागे दुषः उपधायाःऊद्वा स्यात् णौ परे इति सूत्रार्थः।

वैकल्पिकेन ऊकारेदूष्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण दूषि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, दूषि+ लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, दूषि+ल् इति जाते, **तिप्तस्झिसिप्तस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिपि, दूषि+ति इति जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, दूषि+शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, दूषि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, दूषे+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे दूषयति इति रूपं भवति।

**दोषयति कामः**

दुष वैकल्ये इत्यस्माद्धातोः **हेतुमति च** इति सूत्रेण णिच्प्रत्यये दुष्+ णिच् इति स्थिते चकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायाम्, णकारस्य **चुटू** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे दुष्+इ इति जाते, **पुगन्तलघूपधस्य च** इति सूत्रेण गुणे दोष्+इ इति जाते, **सनाद्यन्ताधातवः** इति सूत्रेण दूषि इति णिजन्तस्य धातुसंज्ञायाम्, **वर्तमाने लट्** इति सूत्रेण धातोः लट्लकारे, दूषि+ लट् इति जाते **हलन्त्यम्** इति सूत्रेण टकारस्य इत्संज्ञायाम्, **उपदेशेजनुनासिकइत्** इति सूत्रेण लकारोत्तरवर्ति अकारस्य इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति लोपे, दूषि+ल् इति जाते, **तिप्तस्झिसिप्तस्थ**----इत्यादि सूत्रेण लटः प्रथमपुरुषैकवचने तिपि, दूषि+ति इति

जाते, **तिङ्शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकसंज्ञायाम्, **कर्तरि शप्** इति सूत्रेण धातोः शब्विकरणे, दूषि+शप्+ति इति जाते, पकारस्य **हलन्त्यम्** इति इति सूत्रेण इत्संज्ञायाम्, शकारस्य **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायाम्, उभयोरपि **तस्य लोपः** इति सूत्रेण इत्संज्ञायाम्, दूषि+अ+ति इति जाते, **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे, दूषे+अ+ति इति जाते, **एचोयवायावः** इति सूत्रेण अयादेशे दूषयति इति रूपं भवति।

SRI CHANDRASEKHARENDRA SARASWATHI VISWA MAHAVIDYALAYA
KANCHEEPURAM
SCSVMV